Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



787

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# ॥ श्रीअंबमचरित्रं ॥

( कर्त्ता श्रीअमरसूरिपंमित )

छपावी प्रसिद्ध करनार.

पंमित श्रावक हीरालाल हंसराज. ( जामनगरवाला )

संवत्—१९६६. सने १९१०

किं. रु. १—८—०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

☞ जामनगर जैनभास्करोदय छापखानामां छप्युं.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीअंबमचरित्रं प्रारभ्यते ॥

( कर्त्ता श्रीअमरसूरिपंडित )

छपावी प्रसिद्ध करनार पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

पांतु वः श्रीमहावीर–स्वामिनो देशनागिरः ॥ भव्यानामांतरमल–प्रक्षालनजलोपमाः ॥ १ ॥ प्रणम्य परया भक्त्या । हंसयानां सरस्वतीं ॥ तस्याः प्रसादमासाद्य । करिष्यामि कथामिमां ॥ २ ॥ धर्मात्संपद्यते लक्ष्मी–र्धर्माद्रूपमनिंदितं ॥ धर्मात्सौभाग्यभाग्ये च । धर्मात्सर्वं समीहितं ॥ ३ ॥ अथ धर्मोपरि अंबडक्षत्रियसंबंधः कथ्यते–अस्मिन् भरतक्षेत्रे श्रीवासनगरं, तत्र विक्रमसिंहो राजा राज्यं करोति. अन्यदा प्रस्तावे राजा राजसभायामुपविष्टोऽस्ति, तदा एकः पुरुषः समागत; राज्ञा पृष्टं भोस्त्वं कः? केन कारणेन चात्रायातः? तेनोक्तं हे राजन् शृणु? श्रीगोरखयोगिनी, तस्या ध्यानकुंडलिकासमीपे निधानमस्ति. इदं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वा राज्ञोक्तं हे मानव त्वया कथं तन्निधानं ज्ञातं? तेन कथितं राजन् शृणु? अहं कुरुबकनामा क्षत्रियः, मत्पिता च अंबडनामा क्षत्रियः, स कर्मवशादाजन्मदरिद्री धनार्थं मंत्रयंत्रौषधधातुर्वादादिकं करोति, सर्वत्र पृथिव्यां च भ्रमति, परं धनं न प्राप्नोति. यतः—

अभ्यासकारिणी विद्या। बुद्धिः कर्मानुसारिणी ॥ दानानुसारिणी कीर्त्ति—र्लक्ष्मीः पुण्यानुसारिणी ॥ १ ॥ एकदा मत्पिता धनगिरिपर्वते श्रीगोरखयोगिन्याः समीपे गतः, तत्र गोरखयोगिन्यै प्रणामं कृत्वाग्रे उपविष्टः. तदा योगिन्या पृष्टं भोस्त्वं कः? कस्मात्कारणादत्रायातः? इति पृष्टे सति अंबडेनोक्तं हे मातर्मम मनश्चिंतितं पूरय? तत् श्रुत्वा योगिन्या कथितं, त्वं किं मार्गयसि? अंबडेनोक्तं हे मातर्मम लक्ष्मीं देहि? इदं वचनं श्रुत्वा गोरखयोगिन्या कथितं हे दरिद्रिपुरुष साहसं विना धनादिकार्याणि न सिद्ध्यंति. यतः—साहसीआं लछी हवें। न हु कायरपुरिसाइं ॥ काने कुंडल झलकतां। मसीकज्जल नयणाहिं ॥१॥ इति कथयित्वा गोरखयोगिन्या कथितं यदि त्वं मम सप्तादेशान् करिष्यसि तदा तव लक्ष्मीं दास्यामि, इति कथिते सति अंबड उवाच, हे मातरिदं वचः प्रमाणं, ममादेशान् दे-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हि? यथाहं तान् करोमि. तस्य साहसं दृष्ट्वा योगिन्या प्रोक्तं हे वत्स मम प्रथमादेशं शृणु? पूर्वदिग्विभागे एका गुणवदनानाम्नी वाटिकास्ति, तस्या मध्ये शतशर्करानामा वृक्षोऽस्ति, तस्य फलं त्वमानय? इत्यादेशं श्रुत्वा योगिन्यै प्रणामं कृत्वा अंबडश्चलितः. मार्गे गच्छतस्तस्य प्रत्यूषसमयो जातः, तदा कुंकुममंगलपुरस्य समीपे सरोवरे स श्रांतो निविष्टः, तत्र च तेनाश्चर्यं दृष्टं, पुरुषाः पानीयार्थं मस्तके कुंभान् वहंतो दृष्टाः, सर्वाः स्त्रियश्च तुरगमारूढा अवलोकिताः.

इदमाश्चर्यं दृष्ट्वांबडेन मनसि चिंतितं, अहोऽयं विपरीताचारो देशः! एवं विस्मयप्रपन्नेन तेनैकः पुरुषः पृष्टः, अहोऽस्मिन्नगरे इदं विपरीतं कथं दृश्यते? तस्य कारणं कथय? तदा तेन पुरुषेणोक्तं त्वं मौनं कुरु? यदि स्त्रियः श्रोष्यंते तदा ते किंचिद्विरूपं करिष्यंति. तत् श्रुत्वा अंबडेन कथितं स्त्रीभ्यः कथं भयं? एवं परस्परमालापसंलापं कुर्वतोस्तयोरेकांस्त्रियं ससैन्यां छत्रचामरादिराजचिह्नयुक्तां गच्छंतीं दृष्ट्वा अंबडो विस्मयमापन्नो यावद्विलोकयति, तावत्तया वृद्धयांबड आलापितः भो अंबड एतस्य वराकस्य समीपे कां वार्तां पृच्छसि? मम गृ-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हमागछ ? अहं तव सर्वं वृत्तांतं निवेदयिष्यामि. इति श्रुत्वा अंबडो हृदये साहसं धृत्वा तस्या गृहे गतः, तस्य मंदिरं च तेन ऋधिपूर्णं दृष्टं. तत्र धवलगृहमंडपे नवयौवना अतीवसुरूपा लावण्योपेता एका स्त्री तेन दृष्टा. सा कीदृशी ? श्यामा यौवनशालिनी मधुरवाक् सौभाग्यभाग्योदया । आकर्णं मृगलोचनाऽतिचतुरा प्रागल्भ्यगर्वान्विता ॥ रम्या बालमरालमंथरगतिर्मत्तेभकुंभस्तनी । बिंबोष्ठी परिपूर्णचंद्रवदना भृंगालिनीलालका ॥ १ ॥

सैवंविधा स्त्री तेन सूर्यचंद्राहुमंगलैः सह क्रीडां कुर्वंती दृष्टा. अंबडो मनसि चमत्कृतः सन् यावता तां वृद्धां स्त्रियं किमपि पृछति तावत्तयोक्तं हे अंबड त्वं गोरखयोगिन्या शतशर्करावृक्षस्य फलग्रहणाय प्रहितोऽसि, ततो यावत्तत्फलं तव हस्ते न चटति, तावत्त्वं मम पुत्र्या चंद्रवत्या समं क्रीडां कुरु? अंबडोऽपि विस्मयमापन्नः सन् तत्रोपविष्टः, तदा चंद्रवत्या प्रोक्तं, हे अंबड मया सहैभिः कंडुकैस्त्वं क्रीडां कुरु? परं यस्य हस्तात्कंदुको भूमौ पतिष्यति तेन हारितं ज्ञेयं, यश्च हारयिष्यति सोऽन्यस्य चरणसेवां करिष्यति, इति प्रतिज्ञा ज्ञेया. अंबडेनापि तस्या वचनं प्रतिपन्नं. अथ सातीवचतुरा चंद्रावती यदा सूर्यकंडुकमुछा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लयति, तदा दिवसो भवति, यदा चंद्रकंदुकमुच्छालयति तदा रात्रिर्भवति, यदा राहुभौमस-
त्कान् कंदुकानुच्छालयति तदा संध्याद्वयं भवति, एवं चंद्रावती न हारयति, तदा अंबडेन ग-
दितं ममाप्येकवेलं कंदुकान् देहि? इत्युक्त्वांबडेन कंदुका गृहीताः, यदा सूर्यकंदुकं हस्ते गृ-
हीत्वा स विलोकयति, तावता सूर्यकिरणैः स व्याकुलो बभूव, मूर्छां प्राप्य च सूर्यबिंबमध्ये
स्थितः, तदा चंद्रावत्या सूर्यकंदुकमुछाल्यांबड आकाशे स्थापितः. इतो नागडसारथिः सूर्य-
समीपं समागतः, ततोऽसौ मंडलमध्ये मूर्छां प्रपन्नं नरं दृष्ट्वा मनसि दयां धृत्वाऽमृतग्रहणा-
र्थं चंद्रमंडलंप्रति धावितः, परं तेन गगने चंद्रमंडलं न दृष्टं. तदा नागडेन रोहिणी पृष्टा चं-
द्रः कुत्र गतः? तदा रोहिण्या रुदंत्या कथितं मम भर्त्ता चंद्रावत्या गृहीतोऽस्ति, ततो हे ना-
गड ममेदं दुःखं निवारय? तदा नागडेनोक्तं त्वं मा रोदीः? तव प्राणप्रियं शीघ्रं मेलयिष्या-
मि. इति कथयित्वा स चंद्रावत्या गृहंप्रति चलितः, एवं यदा स चंद्रावत्या गृहसमीपं समा-
गतस्तदा तं दृष्ट्वा क्षुब्धा सती सा तं नागपाशैर्बद्धवान्. तत एषा निजमाता भद्रावत्या सह
हास्यं कर्त्तुं लग्ना.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मिन्नवसरे नागडस्य भगिनी सर्पदुष्टशृंखला नाम्नी समागता, स्वबांधवं च नागपाशैर्बद्धं दृष्ट्वा क्षिप्रं बाणैर्नागपाशं छेदयित्वा स्वभ्रातरं मुत्कलं चकार. नागडो मनसीर्ष्यां धृत्वा फुत्कारं कृत्वा चंद्रावतींप्रति धावितः, तदा चंद्रावत्या सूर्यः स्तंभितः. सूर्येण ज्ञानेनेदं वृत्तांतं ज्ञात्वा स्वपुत्रंनागडंप्रति कथितं, हे पुत्र अनया सह विरोधं मा कुरु? एषा शक्तिरूपिणी योगिन्यस्ति. तद् ज्ञात्वा नागडेन मायाकुंडलिनी शक्तिराराधिता. तस्याः प्रसादेन चंद्रावती नागडेन विनाशिता, चंद्रावत्याश्च मानं मर्दितं, रविमंडलमपि मुत्कलं कृतं, चंद्रमंडलमपि लात्वा रोहिण्यै समर्पितं. ततश्चंद्रमंडलादमृतं लात्वा सूर्यमंडले गत्वा अंबडस्यामृतं पाययित्वा तं सचेतनः कृतवान्. तदा अंबडस्य सूर्येण वरो दत्तः, हे अंबड त्वमनंगजेता भव? पुनः सूर्येण तस्मै आकाशगामिनी इंद्रजालिनी चैवं विद्याद्वयं दत्तं. ततः सूर्यवचनान्नागडेन शतशर्करावृक्षस्य फलं अंबडाय समर्पितं. यो जनस्तत्फलं समीपे धारयति स सुखी भवतीति तस्य महिमा वर्त्तते. अथ सूर्योदेशान्नागडेनांबडो भूमौ मुक्तः पश्चादंबडेन सूर्यदत्ताविद्या साधिता. ततोऽसावीश्वररूपं कृत्वा चंद्रावत्या गृहे समागतः. चंद्रावती शिवं स-

For Private and Personal Use Only

मीपमागच्छंतं दृष्ट्वा सती सन्मुखमागता, ततस्तया कथितं हे देव अद्य मम गृहं पवित्रं जातं. यतः—महातीर्थमहौषध्यो । महानाथो मुनीश्वरः ॥ अल्पभाग्यवतां तेषां । प्रायो दुर्लभदर्शनं ॥ १ ॥ एवं तया भक्तिवचनानि कथितानि. पुनरपि सा यावत्किमपि वदति तावता ईश्वरेण रुदनं प्रारब्धं. चंडावत्या पृष्टं भो ईश त्वं विश्वमध्ये कर्त्ता हर्त्ता, तव किं दुःखं वर्त्तते? यद्रुदनं करोषि? तदा शिवेनोक्तं मम प्राणप्रिया पार्वती मृता, तेनाहं रुदनं करोमि. तत् श्रुत्वा चंडावत्या कथितं हे स्वामिन् मत्सदृशं कार्यं समादिश? तदा शंभुनोक्तं त्वं मम प्राणप्रिया भव? तत् श्रुत्वा चंडावत्या कथितं स्वामिन्नहं मानुषी अपवित्रा कथं भवद्योग्या भवामि? शिवेनोक्तं त्वं मम योग्यैव वर्त्तसे, अतो मम वचनं मन्यस्व? तवेप्सितं पूरयिष्यामि. तदा चंडावत्यापि पाणिग्रहणं मानितं. ततः शिवेन कथितं मम कथनं कुरु? प्रथमं मस्तके भद्रं कारय? शटितत्रुटितवस्त्रादीनां परिधानं कुरु? मुखं कज्जलेन विलेपय? गर्दभारोहणं च कुरु? ततश्चंडावत्या तत्सर्वं कृतं, मध्याह्ने च तया गर्दभारोहणं कृतं, अंबडोऽपि शिवरूपेण समागतः, तस्मिन्नवसरे तद्विलोकयितुं मिलिता लोकाः परस्परमेवं प्रवदंति, धन्येयं चं-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शवती, यस्याः पाणिग्रहणमीश्वरेण कृतं, संप्रति सा कैलासे व्रजिष्यति.

इति लोकानां वचनानि श्रुत्वा हृष्टा सती सा यावदाकाशे विलोकयति, तावता गर्दभेन वारत्रयं चंडावत्याः शिरसि पादप्रहारो दत्तः, तदा चंडावत्या शिवंप्रति कथितं हे स्वामिन्! लोकसमक्षं हास्यं मा कुरु? पुनः शिवस्य वृषभेण मारिता सती सा रोदितुं प्रवृत्ता, ततस्तया यदाकाशे विलोकितं तदेश्वरो न दृष्टः, तदा सा विलक्षा जाता. लोका अपि भो चंडावति किं त्वं कैलासे गत्वा समायाता? इति तस्या हास्यं कर्त्तुं प्रवृत्ताः. पश्चादंबडेन शिवरूपं संहृत्य मनुष्यरूपं कृत्वा तस्यै कथितं, हे चंडावति मया सूर्यमंडलं जितं, अतः पुनर्मम क्रीडाया वारकं देहि? तत् श्रुत्वा तया कथितं त्वयाहं कथं विगोपिता? नूनं त्वं गर्दभोऽसि. अंबडेन गदितं, अथ त्वं मे विरूपं मा ब्रुहि? अन्यथा पुनरपि तव किंचिद्विपरीतं करिष्यामि. यतः—न कोपनीयाः केनापि । साक्षरा हितकांक्षया ॥ विपरीतास्ते जायंते । राक्षसा इव केचन ॥ १ ॥ अतः कारणात्त्वं मौनं कुरु? तत् श्रुत्वा चंडावत्यपि भयार्त्ता मौनमवलंब्य स्थिता, ततः कंदुकक्रीडायां चंडावत्यंबडेन जिता, तदांबडेन कथितं हे चंडावति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संप्रति त्वं मम चरणसेवां कुरु? अथवा मां वृणु? तत् श्रुत्वा विमृश्य चंद्रावत्यांबडो वृतः. ततोंबडेन तस्यास्तन्नगरस्वरूपं पृष्टं, तयोक्तं हे स्वामिन्निदं शक्तिरूपं नगरं शक्तिना स्थापितमस्ति. अनेन कारणेन सर्वमप्यत्र विपरीतं दृश्यते. तत् श्रुत्वांबडेन कथितं, हे प्रिये त्वं कीदृशीर्विद्या जानासि? तयोक्तं हे स्वामिन्नहमाकाशगामिनीं चिंतितगामिनीं स्वरूपपरावर्त्तिनीं आकर्षिणीं च विद्यां जानामि. अथांबडस्तया सार्द्धं तत्र कतिचिद्दिनानि स्थितः, पश्चात्सुवर्णादिधनं गृहीत्वा चंद्रावत्या सहांबडः स्वस्थानकंप्रति चलितः, कुशलेन च गोरखयोगिनीसमीपे समागतः, योगिनी च तेन नमस्कृता, शतशर्करावृक्षस्य च फलं तेन तस्यै समर्पितं. पश्चादंबडश्चंद्रावत्या सह स्वगृहे गतः सुखं भुंक्ते. इति प्रथमादेशः.

पुनः कतिचिद्दिवसानंतरमंबडेन गोरखयोगिन्यै नमस्कृत्य कथितं, हे मातरथ त्वं द्वितीयमादेशं मे देहि? योगिन्या कथितं वत्स शृणु? समुद्रमध्ये दक्षिणदिग्विभागे हरिद्वत्रनामा द्वीपोऽस्ति, तत्र कमलकांचननामा योगी वसति, तस्यांधारिकामानय? इत्यादेशं श्रुत्वा स गगनमार्गेण चलितः, द्वीपपरिसरे समागत्य तेन चिंतितं तस्य योगिनः स्थानं कथं ज्ञास्य-

For Private and Personal Use Only

ते ? अथ क्षणमेकं तत्र स्थित्वा स वनंप्रति चलितः, तदा तस्य कोऽपि पुरुषः सन्मुखं मिलितः, तेन चांबड आलापितः, हे अंबड त्वं घनैर्दिनैर्मार्गविलोकनं कुर्वन्नत्र समायातः तत् श्रुत्वा विस्मितेनांबडेन कथितं हे सत्पुरुष अहमत्र कामलकांचनयोगिनो मिलनाय समागतोऽस्मि, तेनोक्तमहमेव कमलकांचनयोग्यस्मि. अथ तस्मिन्नवसरे कमलकांचनस्यांधारिका रुदितुं लग्ना, तदा योगिना तस्यै कथितं रे त्वं कथं रुदनं करोषि, तयोक्तमेष धूर्तो मां गृहीतुं समेतोऽस्ति. योगिनोक्तं मयि विद्यमाने कोऽपि त्वां न लास्यति. तत् श्रुत्वांबडोऽतीव चमत्कृतः. ततः कमलकांचनयोगिनांबडंप्रति पृष्टं किं त्वं गोरखयोगिन्याऽत्र प्रहितोऽसि? तेनापि तथेत्युक्तं. ततो योगिनांबडो निजपुरुषसार्द्धं स्वगृहे प्रेषितः. तत्र कागीनागीनाम्न्यौ तस्य योगिनो द्वे प्रिये आस्तां. ताभ्यां गोरखयोगिन्याः कुशलपृच्छानंतरमंबडो भोजितः, भोजनानंतरं चांबडः कुर्कुटो जातः. यतः—आरोहति गिरिशिखरं । समुद्रमुल्लंघयति याति पातालं ॥ विधिलिखिताक्षरमालं । फलति कपालं हि भूपाल ॥ १ ॥ अथ ते कागीनाग्यौ मार्जाररूपेणांबडं प्रहारैर्मारयितुं लग्ने. इतः कमलकांचनोऽपि गृहे समेत्य कुर्कुटरूपधारिणमं-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बडंप्रति कथयति, भो अंबड त्वया ममांधारिकां गृहीतुं य उपक्रमो विहितस्तस्येदं फलमनुभव, एवमंबडस्तत्र दुःखेन निजं कालं गमयति. अथैकदा कमलेन स्वप्रियेप्रति कथितं, भो प्रिये अथैषः कुर्कुटो वनमध्ये मोचनीयः, तत् श्रुत्वा ताभ्यां स कुर्कुटो वनमध्ये मुक्तः, तत्रांबडः कुर्कुटरूपेण वनमध्ये तिष्टति. एकदा स निकटस्थवापीमध्ये पानीयं पातुं प्रविष्टः, तत्र चाकंठं पानीयं पीत्वा स बहिर्निर्गतः, तत्कालं च स मनुष्यरूपो जातः, तदा चिंतितं च तेनाऽचिंत्यो हि मण्यौषधीनां प्रभावः. अथ हृदि हृष्टः सन्नंबडो वने भ्रमति.

इतो रात्रौ तेन कस्या अपि स्त्रियो रुदनं श्रुतं, तदा तेन चिंतितमत्र वने स्त्रीयो रुदनं कुतः! ततोऽसौ शब्दानुसारेण तस्याः स्त्रियः समीपे समागतः, पृष्टं च तेन भो सुलोचने त्वं कथं रुदनं करोषि! इति पृष्टे सति तया कथितं हे सत्पुरुष मम वृत्तांतं शृणु! रोलगपुरपत्तने हंसनामा राजा, तस्य श्रीमती राज्ञी, तयोरहं पुत्री राजहंसीनाम्नी, क्रमाच्चाहं पाणिग्रहणयोग्या जाता. तदा मम पिता हरिश्चंद्रनामा राजकुमारो मत्पाणिग्रहणार्थं समाकारितः, सोऽपि लग्नदिवसे महोत्सवेन विवाहमंडपे समयातः, अहमपि तदा सशृंगारा तत्र

For Private and Personal Use Only

समायाता. पश्चान्मया सूर्यदत्तः कंचुकः परिहितः, हस्तमेलापकार्थं च ब्राह्मणा मिलिताः, तस्मिन्नवसरे केनापि दुष्टपुरुषेण मे कंचुकग्रहणार्थमहमाकाशे समुत्पाटिता, तेन घनं बलं कृतं, परं मया कंचुको न मुक्तः, ततः खिन्नेन तेन पुरुषेणाहं व्योम्नोऽत्र भूमौ मुक्ता, अथ न जाने स मम किं करिष्यतीति. तेन कारणेनाहं च रुदनं करोमि. अंबडेन पृष्टं भो सुलोचने त्वयैषः सूर्यदत्तः कंचुकः कथं लब्धः? इति पृष्टे सति राजकुमारी कंचुकवृत्तांतं कथयति. बाल्यत्वावातिक्रमणानंतरमहं मातापितृभ्यां सरस्वत्याख्यपंडितासमीपे पठनार्थं मुक्ता, सापि मां निरंतरं पाठयति, तत्रान्या अपि व्यवहारिणां सप्त कुमारिका मया सह पठनार्थं समागच्छंति. एकदा वयं सर्वा अपि कुमारिकास्तस्या लेखशालायां रात्रौ शयनार्थं स्थिताः, मध्यरात्रौ तया पंडितया ब्राह्मण्या मंडलं मंडितं तत्र मंडले चतुःषष्टियोगिन्यः समागत्य क्रीडयितुं प्रवृत्ताः.

तदा हृष्टया पंडितया योगिनीपार्श्वे सिद्धिर्मार्गिता, योगिनीभिः कथितं प्रथमं त्वं प्राणपिंडं देहि? पश्चाद्वयं तव सिद्धिं दास्यामः, तत् श्रुत्वा सरस्वतीपंडितया कथितं मयैता अ-



For Private and Personal Use Only

ष्टावपि कुमारिका युष्मदर्थे कल्पिताः संति, अतो विधिविधानदिनं यूयं कथयत ? यत्तस्मिन् दिनेऽहं बलिविधानं करोमि. तत् श्रुत्वा योगिनीभिः कथितं हे सरस्वति कृष्णचतुर्दश्यां रविवासरे मध्याह्नसमये त्वयैता अष्टौ कन्या नैवेद्यसहिता अस्मभ्यं कल्पनीयाः, इति कथयित्वा सर्वा अपि योगिन्यः स्वस्थानं गताः. अथैषः सर्वोऽपि वृत्तांतोऽस्माभिः प्रछन्नवृत्त्या दृष्टः श्रुतश्च, ततो वयं मरणभयभीताः संजाताः, यतः—पंथसमा नत्थि जरा । दारिद्दसमो परिभवो नत्थि ॥ मरणसमं नत्थि भयं । खुहासमा वेयणा नत्थि ॥ १ ॥ सर्वसखीभिः कथितमथ किं करिष्यते ? तदा मया कथितं नृपस्यैतत्सर्वं कथ्यते, सूर्यस्य चाराधनं क्रियते, एष एवास्माकं जीवितोपायोऽस्ति. सर्वसखीभिरप्येतत्स्वीकृतं. ततो राजकुमार्या तत्सर्वं स्वरूपं निजपितुरग्रे कथितं. तद् ज्ञात्वा राजादीनां क्रोधो जातः, पश्चाद्राज्ञा सरस्वतीपंडिताया जीवितहरणकृते स्वसेवकायादिष्टं. तदा राजकुमार्योक्तं हे तातैषा ब्राह्मणी क्रूरा दुष्टास्ति, ततस्तव विरूपं करिष्यति. ततो भीतो नृपोऽवदत् हे पुत्रि तर्हि किं करिष्यते ? तदा मया कथितं हे तात सूर्यस्याराधनं क्रियते, तस्य प्रसादाद् ध्रुवं जयो भविष्यति. तदा राज्ञा कथि-



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं वत्से तर्ह्येतत्स्त्वरं कुरु? पश्चादस्माभिरादित्यः समाराधितः, सूर्येणापि प्रत्यक्षीभूयैव कंचुको मे समर्पितः, शेषाभ्यः सर्वाभ्योऽपि कुमारीभ्यः सप्त गुटिका अर्पिताः. पुनः सूर्येण कथितं हे वत्से यदा सैषा दुष्टा पंडिता योगिनीसमर्पितां शाटिकां परिधारयेत्तदा त्वयैषः कंचुकः प्रावरणीयः, शेषाभिश्च युष्माभिर्मुखे गुटिका धारणीयाः, येन सर्वेषामपि युष्माकं कुशलं भविष्यति, इति च कृते सति सा दुष्टा सरस्वतीपंडिता स्वयमेव पंचत्वं प्राप्स्यति. इति शिक्षां दत्वा सूर्योऽदृश्यो बभूव.

अथ वयं सर्वा अपि बालिकाः सानंदा जाताः सत्यो सर्वदा तस्याः समीपे पाठशालायां पठनार्थं गंतुं प्रवृत्ताः. अथ कियद्दिवसानंतरं तया पंडितयास्मभ्यं कथितं हे बालिकाः भवतीनां सर्वासामपि किंचित्संकटं समागतमस्ति, ततो यदि चेद्भवतीनामिच्छा तर्हि तदागच्छद्भवत्संकटमहं निवारयामि. तयेति कथिते सत्यस्माभिः प्रोक्तं हे मातरस्मदीया चिंता भवत्या एव वर्त्तते, यथा नो रम्यं भवेत्तथा क्रियतां? तत् श्रुत्वा तया हृष्टया दुष्टया कथितं, हे पुत्र्यः यद्येवं तर्ह्यद्यैव रविवासरो विद्यते ततोऽद्य सर्वाभिरपि युष्माभिर्मध्याह्ने मम गृहे स-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मागंतव्यं. अथ वयमपि तस्मिन्नवसरे तस्या गृहे गताः, तदा तयापि तत्राष्टौ मंगलानि कृतानि, तत्र च तया क्रमेण वयं स्थापिताः. ततो नैवेद्यपूजामंत्रादिविधिं कृत्वा सा गृहमध्येऽपवरकांतर्गता. तदास्माभिरपि कंचुकपरिधानगुटिकामुखप्रक्षेपादिकार्यं कृतं. इतः सा दुष्टापि शाटिकां परिधाय बहिरागता, तत्कालमस्माभिर्मिलित्वा तस्याः शाटिका निष्कास्य गृहीता. तदैव सा दुष्टा पंडिता मृता. तद् दृष्ट्वा लोकैरप्युक्तं भव्यं जातं, अस्माकं च जयवादो जातः, अतो हे सत्पुरुष इत्यनेन प्रकारेण मया स प्रभावान्वितः कंचुकः प्राप्तोऽस्ति. इति कथयित्वा सा पुना रोदितुं प्रवृत्ता.

तदा अंबडेनोक्तं हे सुभगे त्वं मा रोदीः, अहं तव सहायं करिष्यामि. इत्युक्त्वांबडेन स्वरूपं प्रकटीकृतं. अथांबडं देवकुमारोपमस्वरूपान्वितं दृष्ट्वा साश्चर्यं सा चिंतयामास, निश्चितमेष सामान्यपुरुषो न विद्यते, विद्याबलर्द्धियुतो दृश्यते, अतो मया मनसैष एव पुरुषो वृतः, इति विमृश्य तया कथितं, हे स्वामिन् त्वं मां वृणु? अद्यैव लग्नदिनं वर्त्तते. एवंविधं तस्या अभिप्रायं ज्ञात्वांबडेन संतुष्टेन तस्याः पाणिग्रहणं कृतं, तत्रैव स सुखेन तया सह दिनानि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गमयति. अथैकदिने तया स्त्रिया कस्याप्यपूर्ववृक्षस्य फलं भक्षितं तत्फलभक्षणप्रभावाच्च सा गर्दभी जाता, निष्ठुरशब्दं च कर्तुं लग्ना. स्वभर्तुः समीपं च प्राप्ता, अंबडेन निजप्रियामेवं दुर्दशां प्राप्तां विलोक्य तत्कालं तद्वापीपानीयं पाययित्वा पुनरपी स्त्रीरूपधारिणी कृता, तदा तया हृष्टया निजस्वामिने पृष्टं, भो स्वामिन् त्वयैतद्वापीजलमाहात्म्यं केन प्रकारेण ज्ञातं? तदांबडेन सर्वोऽपि वृत्तांतो निजप्रियायै कथितः, तद्वृत्तांतं श्रुत्वा सा संतुष्टा जाता. पश्चात्तया तद्रूपपरावर्त्तनकारिवृक्षस्य फलं स्वभर्तुर्दर्शितं.'अंबडेनापि तत्फलं गृहीत्वा तस्यै कथितं, हे प्रिया सा योगिन्यर्पिता शाटिका कुत्रास्ति? तयोक्तं सा शाटिका रोलगपुरपत्तने समस्ति. तत् श्रुत्वांबडेन कथितं, तर्हि तत्र गत्वा सा शाटिका गृह्यते. राजहंस्योक्तं हे स्वामिन् तन्नगरमतीव दूरं वर्त्तते. तत् श्रुत्वांबड आकाशगामिनीविद्यायाः प्रभावेण तया सार्द्धं तस्मिन्नगरे गतः, तत्रांबडो वनमध्ये स्थितः, राजहंसी च स्वपितुर्गृहे गता. तां दृष्ट्वा नृपो राज्ञी चातीवहृष्टौ. पृष्टं च ताभ्यां भो वत्से त्वं केनापहृता? इति प्रश्ने कृते राजहंस्या स्वपित्रोरग्रे सर्वोऽपि निजव्यतिकरो निवेदितः, पश्चाद्राज्ञा राजकुमारीकथनतो महताडंबरेणां-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बडो निजनगरमध्ये प्रवेशितः, तत्र च महोत्सवपूर्वकं राजहंस्याः पाणिग्रहणमंबडेन सह कारितं. हस्तमोचनावसरे च राज्ञांबडाय निजार्द्धं राज्यं समर्पितं. ततस्ताभिः सप्तव्यवहारिपुत्रीभिरपि निजविवाहोंबडेन सह कृतः, एवमष्टाभिः प्रियाभिः सहांबडस्तत्र सुखेन स्थितः. एकदा सर्वाभिस्ताभिः सह निजार्द्धराज्यसैन्यं तेन निजनगरंप्रति भूमिमार्गेण प्रस्थापितं. अंबडस्तु स्वयं गगनमार्गेण चलितः, क्रमेण पूर्वोक्तवने गत्वा तद्वापीजलं रूपपरावर्त्तनवृक्षफलं च गृहीत्वा स हरिछत्रद्वीपे गतः, तत्र च कमलकांचनयोगिसदृशं स्वरूपं कृत्वा कागीनागीयोगिनीगृहे च समागतः. कथितं च हे प्रिये इदं शाकं गृहाणं, अधुनैव च तस्य संस्कारं कुरुतं? अद्य शीघ्रं भोजनं कार्यं. इति कथयित्वा तेन शाकमध्ये तत्फलं मुक्तं.

पश्चादंबडेन कागीकलत्ररूपं कृत्वा कमलकांचनयोगिनः समीपे च गत्वा कृत्रिमस्नेहेन प्रोक्तं हे स्वामिन् यूयं शीघ्रमद्य गृहे समागछत शाकादिसामग्रीसहितं भोजनं निष्पन्नमस्ति. एवं निजकलत्रस्नेहवचनानि श्रुत्वा कमलकांचनो निजगृहं प्रति प्रस्थितः. ततोंबडेन तस्योटजे प्रविश्य तदंधारिका गृहीता, यदा च सा रुदनं कर्त्तुं प्रवृत्ता तदांबडेन च पेटया ताडिता स-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ती मौनमवलंब्य स्थिता. एवं तस्यांधारिकां गृहीत्वांबडो निजकटकमध्ये समायातः, सांधारिका च राजहंस्यै समर्पिता. पुनरप्यंबडो निजस्वरूपेण कमलकांचनगृहे समागत्य विनोदं पश्यति. ततस्तेनैको गर्दभो गर्दभीयुग्मं च परस्परं पादप्रहारैर्युद्धं कुर्वद् दृष्टं. ते त्रयोऽपि तारस्वरेण शब्दं कुर्वंति, लोका अपि तन्महदाश्चर्यं विलोकयंति. तद् दृष्ट्वांबडेनानंदपूरितेन तेभ्यः कथितं हे कमलकांचन हे कामीनाग्यौ च किं पुनः कदाप्यंबडं कुर्कुटं करिष्यथः? इति कथयित्वा स तांस्तर्जयामास. पुनरपि तेन कमलकांचनंप्रति कथितं भो कमलकांचन तवांधिरिका क्व गता? मयैव सा गृहीतास्ति, इति कथयित्वा स तेषां त्रयाणामुपर्यारुह्य तान् बाढं कुट्टयति.

एवं तेषां बहुविधां विडंबनां कृत्वा लोकप्रार्थनया तेषां तद्वापीसत्कं पानीयं पाययित्वा मनुष्यरूपिणः कृताः. तदा लोकैरुक्तं–बलिभ्यो बलिनः संति । वादिभ्यः संति वादिनः ॥ गुणिभ्यो गुणिनः संति । तस्मान्मानं परित्यजेत् ॥ १ ॥ पश्चादंबडो निजकटके गत्वा निजनगरंप्रति चलितः, कियद्भिर्दिनैश्च स्वनगरं प्राप्तः, तत्र गोरखयोगिनीं नमस्कृत्य तेन सांधा-



For Private and Personal Use Only

रिका तदाग्रे मुक्ता. तद् दृष्ट्वा गोरखयोगिन्यपि हृष्टा सती कथयामास हे वीर इदं कार्यं त्वया विषमं कृतं, अन्यः कोऽपि तत्कर्त्तुं समर्थो न भवति. एवं तया तस्यातीवप्रशंसा कृता, तदनु सोंबडः स्वावासे गतः, निजकलत्रैः सह राज्यसुखं च भुनक्ति. इति द्वितीयादेशः ॥

अथैकदांबडो गोरखयोगिनीसमीपे समागत्य कथयामास हे मातरथ मे तृतीयमादेशं देहि? योगिन्या कथितं हे वत्स सिंहलद्वीपे सोमचंद्रो राजा, तस्य चंद्रा राज्ञी, तयोश्च चंद्रयशानाम्नी सुता वर्त्तते. तस्या भांडागारे एका रत्नमालास्ति, तां रत्नमालामानय? इति श्रुत्वांबडः सिंहलद्वीपं प्रति चलितः, कियद्भिर्दिनैश्च स सिंहलद्वीपं प्राप्तः. तत्र तेन नानाविधफलानम्रवृक्षोपेतमेकं वनं दृष्टं. तत्रस्थितोऽसौ मनसि चिंतयति यद्राजभुवने मम कथं प्रवेशो भविष्यतीति. इति चिंतयन् सन् स एकां नवयौवनां सुरूपां मस्तकोपरिवनसहितां कामपि स्त्रियं दृष्ट्वा मनसि विस्मितः सन् यावत्तां विलोकयति, तावत्सा स्त्री समीपमागता, अंबडेन तामेव चंद्रयशां ज्ञात्वा सालापिता, हे चंद्रयशे त्वं कुत्र यासि? तत् श्रुत्वा तया प्रोक्तं हे सत्पुरुष त्वं नूनमज्ञातो दृश्यसे, यन्मामपि चंद्रयशाभिधानेनालापयसि. सा चंद्रय-

 



शास्त्रिधाना राजपुत्री तु मम सखी वर्त्तते. अहं च वैरौचनप्रधानस्य राजलदेवीनाम्नी पुत्र्यस्मि. तदांबडेन पृष्टं हे सुलोचने तव मस्तकोपरि वनं कथं दृश्यते? तत्संबंधिनीं कौतुकवार्त्तां मे कथय? तत् श्रुत्वा स्त्री कथयति हे उत्तम शृणु?

एकदाहं राजपुत्र्या सह वने क्रीडां गंतुं गता, तत्रैकां वृद्धां स्त्रियं दृष्ट्वावां उपयन्नीते जाते, इतः सा वृद्धा स्त्री अस्मत्समीपमागता, तदावामपि साहसं धृत्वा तदग्रे स्थिते. तत्कालं तया वृद्धया कथितं भो पुत्र्यौ युवां कुत्र गच्छतः? तदावाभ्यां कथितं भवच्चरणनमस्कारार्थमावामत्र समागते स्वः. इति कथिते सा संतुष्टा कथयति हे बालिके यदि यूवां मया सार्द्धं समागच्छेतं, तर्हि युवयोरीश्वरदर्शनं कारयामि. तदा मया कथितं हे मातः क्व इश्वरः? तत्र च केन प्रकारेण गम्यते? तत्सकलस्वरूपं निवेदय? तत् श्रुत्वा वृद्धया प्रोक्तमहं कैलासपर्वते ईश्वरपार्वत्योः प्रतिहारिकास्मि, ममाचिंत्या शक्तिर्वर्त्तते. 

तत् श्रुत्वा मया कथितं तर्ह्यावयोस्त्वं कैलासपर्वतं दर्शय? इति कथनानंतरं सा तूर्णं नौ कैलासपर्वतेऽनयत् तत्रावामीश्वरपार्वत्यौ प्रकटस्वरूपस्थावपश्यतां. तत्सर्वं स्वप्नप्रायं दृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्वावाभ्यां सा वृक्षा पृष्टा, हे मातरिदं सर्वमिंद्रजालं वा सत्यं? तदा तया वृद्धयोक्तं हे वत्से इदं सर्वमपि सत्यमस्ति. तत् श्रुत्वावाभ्यामीश्वराय नमस्कारः कृतः, अथ शिवेन तस्यै वृक्षायै पृष्टं हे वृद्धे एते स्त्रियौ कुतः समायाते, तयोक्तमेते मानुष्यौ भवच्चरणनमस्कारार्थं समागते स्तः, इति कथितेऽतीवसंतुष्टो महेश्वरो राजकुमारीकंठे दिव्यां रत्नमालां क्षिप्तवान्, मह्यं च तेन निजकूर्मदंडः समर्पितः. तदावाभ्यां शिवो विज्ञप्तो हे देव अनयोर्महिमानं कथयत, महादेवेनोक्तमनया रत्नमालया चिंतितं रूपं क्रियते, जयलक्ष्मीश्च भवति. कूर्मदंडेन तु शत्रुरोगप्रमुखा विघ्ना नाशं प्रयांति.

अथावाभ्यां तस्मै विज्ञप्तिः कृता यद् हे देव यथा नित्यं भवच्चरणसेवार्थमावाभ्यामागम्यते तथा कुरुत? तन्निशम्य शंकरेणावाभ्यां त्रिदंडनामा वृक्षः समर्पितः, कथितं चैष वृक्षो नित्यं भवतीभ्यां मम दर्शनं कारयिष्यति. पश्चात्तया वृद्धयावां कैलासादत्रानीय मुक्ते. एवमावां नित्यं तद्वृक्षोपर्यारुह्य शिवस्य नमस्कारार्थं गच्छावः, पुनरत्रागमनानंतरं च स वृक्षोऽत्रास्मद्गृहांगणे तिष्ठति. एवंविधामाश्चर्यान्वितां वार्त्तां श्रुत्वा चमत्कृतेनांबडेन पुनः पृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ष्टं हे सुलोचने परं तव मस्तकोपरि वनं कथं स्थितमस्ति? इति पृष्टे तयोक्तं हे सत्पुरुष एकदावां कैलासे गच्छंत्यौ सूर्येण दृष्टे. तदा सूर्येण ज्ञातं यत्कापि शाक्तिर्मनुष्यं भक्षयित्वा मां भक्षयितुं समागच्छति. परं निकटमागते आवां मानुष्यौ दृष्ट्वा निर्भयेन तेनाहं पृष्टा, भो सुलोचने युवयोर्नित्यं क्व गमनं भवति? तदावाभ्यां सर्वोऽपि वृत्तांतः सूर्याय कथितः, तदा सूर्येणावां महादेवस्य भक्तिकारिण्यौ विज्ञाय तुष्टेन सुकोमलवचनैः कथितं हे वत्से युवां वरं मार्गयतं? आवाभ्यां कथितमावयोर्वरमार्गणे किमपि प्रयोजनं नास्ति, केवलमीश्वरस्य भक्तिरेव भवतु.

तथापि संतुष्टेन सूर्येण राजकुमार्यै निजभांडागारमध्यात्तिलकाभरणं दत्वा कथितमनेन तिलकेनांधकारेऽप्युद्योतो भविष्यति. पुनर्मह्यं च मम मस्तकोपर्यपूर्वं सहचारिवनं दत्तं. अनेन प्रकारेण शिवपूजां समाचरंत्योरावयोर्दिनानि यांति. अथांबडस्तया सार्द्धं नगरमध्ये प्रविष्टो राजमार्गं च प्राप्तः, तत्रांबडेन नटरूपं कृत्वा नाट्यं प्रारब्धं. मृदंगे वाद्यमाने सति तत्र भूरिलोका मिलिताः संतः परस्परं जल्पंति अहो महकलावानयं नटो भव्यं नाट्यं करि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ष्यति. ईदृशानि लोकोनां वचनानि श्रुत्वा बहुरूपिणीविद्यास्मृता तेनैकत्रिंशन्नव्यो निष्पादिताः, ताः सर्वा अपि नाट्यं कुर्वंति. अथैषा वार्त्ता नगरमध्ये सर्वत्र प्रसृता, अथ तद् ज्ञात्वा चंद्रयशापि निजसखीसहिता बहुजनपरिवृता तत्र कौतुकविलोकनार्थं समागता. तत्र निजसखीं राजलदेवीमपि नृत्यंतीं दृष्ट्वा चंद्रयशया कथितं, हे सखि इदं किं जातं? राजलदेव्योक्तं हे सखि इदं रम्यनादसहितं नाट्यं वर्त्तते. यतः—

सुखिनि सुखनिदानं दुःखितानां विनोदः। श्रवणहृदयहारि मन्मथस्याग्रदूतः॥ चतुरनरसुगम्यो वल्लभः कामिनीनां। जयति जगति नादः पंचमः सैष वेदः॥ १ ॥ अतो हे चंद्रयशे त्वमप्यत्र नाट्यकरणार्थं समागच्छ? अथैनं वृत्तांतं श्रुत्वा राजलदेव्या मातृपितृबांधवप्रमुखाः स्वजना राज्ञोऽग्रे समागत्य कथयामासुः, हे स्वामिन् अनेन नरेण नूनं राजलदेवी प्रतारितास्ति, अथ किं क्रियते? तत् श्रुत्वा चमत्कृतो नृपोऽपि तत्र समायातः. इतोंबडेन विष्णुमहेशब्रह्मणां स्वरूपं कृत्वा रसालं नाटकं प्रारब्धं. पंचशब्दोपेतानि मनोहरवादित्राणि वादयति, तद दृष्ट्वा नाट्यरसलुब्धा नृपादिसर्वलोका मनस्येवं चिंतयंति, यदयं क्षणमपि ना-



For Private and Personal Use Only

व्यं यदा न मुंचति तदा वरं. दानावसरे च नृपो रत्नसुवर्णवस्त्राभरणादि यत्किंचिदपि दत्ते तत्सोंबडो न गृह्णाति. तदा राज्ञा लोकैश्च ज्ञातं यदयं कोऽपि देवो विद्याधरः सिद्धकुमारो वा वर्त्तते यतः—

निःकामस्य तृणं नारी । निरीहस्य तृणं नृपः ॥ तृणं राजसुता पुंसां । तृणं शूरस्य जीवितं ॥ १ ॥ पश्चादंबडेन रससंयुक्तं नाटकं विसर्जितं. सर्वेऽपि लोका तन्नृत्यं वर्णयंतः स्वस्वस्थानके गताः. तदा राजलदेवी मातृपितृभ्यां पृष्टा, हे वत्से त्वं केन धूर्त्तेन विप्रतारिता? त्वया कथं नाटकं कृतं? तया कथितं हे पूज्यौ अहं किमपि विप्रतारिता नास्मि, एष एव कलावान् पुरुषो मम भर्त्ता भविष्यति. तत् श्रुत्वा ताभ्यां कथितं रे मूर्खे त्वमिदं किं वचनं भाषसे? तत् श्रुत्वा सापि मौनं स्थिता.

यतः—यच्छ्रोतव्यं गुरुजनवचस्तत्तदेवातिशौर्यं । यत्स्वाधीनं कदशनमपि स्वादु पथ्यं तदेव ॥ यन्मर्त्तव्यं शरणरहितं जीवितव्यं तदेव । यद्दारिद्र्यं कृपणजनदया प्राणिनां सैव लक्ष्मीः ॥ १ ॥ अथ संध्यासमये राजलदेवी निजसख्या राजकुमार्याः समीपे गता, तदा त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



या चंद्रयशया सा निजसखी राजलदेवी पृष्टा, हे सखि अद्य त्वया सह येन पुरुषेण नाटकं कृतं स कः पुरुषोऽस्ति? तस्य पुरुषस्य ध्रुवं किमपि पारंपर्यं कलाविज्ञानं दृश्यते, अतस्तस्य पुरुषस्य संबंधि सकलमपि वृत्तांतं ममाग्रे त्वं निवेदय? तदा राजलदेव्या तस्याः पुरः स्वस्वरूपं तत्पुरुषस्वरूपं च सकलमपि निवेदितं. तन्निशम्य राजकन्यया प्रोक्तं अहमपि तमेव वरं वरिष्यामि, अतो ममाप्येष एव वरो भवतु. ततस्तया राजलदेव्यै कथितं हे सखि स पुरुषोऽद्य रात्रौ त्वया ममावासे प्रेषणीयः, तथेत्युक्त्वा राजलदेवी निजावासे समागता. तदनंतरमंबडोऽपि राजलदेवीगृहे समायातः, राजलदेव्यापि सर्वं राजपुत्रीस्वरूपं तस्मै निवेद्य सुवर्णगवाक्षाभिज्ञानपूर्वकं स राजसुतासमीपे प्रहितः. एवमंबडोऽथ राजसुतावासे सुखेन समागतः. राजसुतयाप्यंबडस्य बहुमानपूर्वकं विनयादिप्रतिपत्तिः कृता. परस्परं स्नेहवार्त्तालापानंतरमंबडेन राजकुमार्यै तांबूलबीटकं समर्पितं, तन्मध्ये च हस्तलाघवेन तेन तत्फलचूर्णं क्षिप्तं. अथांबडो निजस्थानकंप्रति समायातः. राजसुतापि तांबूलबीटकमास्वाद्य सुप्ता, प्रभातसमये च दासीवर्गेण सा चंद्रयशाकुमारी गर्दभीरूपा दृष्टा. तद् दृष्ट्वा चकिताभि-



For Private and Personal Use Only

 स्ताभिस्तत्स्वरूपं राज्ञोऽग्रे निवेदितं. तत् श्रुत्वा राजापि विस्मितस्तत्रागतः, सूरयो नगरलो- 
का अपि तत्र मिलिताः.

 अथैतद्दुर्दशां प्राप्तां तां विलोक्य राजाराज्ञ्योर्मनसि महद्दुःखं संजातं. तदनंतरं राज्ञा ब-हून् वैद्यादीनाकार्य तस्या उपचाराः कारिताः, परं ते सर्वेऽप्युपचारा निष्फला जाताः, तदनु खिन्नेन राज्ञा नगरमध्ये पटहोद्घोषणा कारिता, यद् यः कोऽपि मम पुत्रीं नीरोगां करिष्यति तस्मै अहमेकां स्वर्णकोटीं दास्यामि. तत् श्रुत्वा सर्वेपि मंत्रतंत्रादिवादिनः प्रतीकारान् कर्त्तुं लग्नाः, परं राजपुत्र्याः स्वल्पमात्रोऽपि गुणो न संजातः. तदनंतरमतिशोकातुरेण राज्ञा राजलदेवीकथनतः पुनरपि नगरमध्ये एवंविधा पटहोद्घोषणा करिता, यद् यःकोऽपि राजपुत्रीं नीरोगां करिष्यति, तस्मै राजा निजार्द्धराज्यं तां कन्यां च दास्यति. एवंविधो नगरमध्ये वाद्यमानः पटहोंबडेन योगिरूपं कृत्वा स्पृष्टः, तत्कालमेव राजसेवकै राज्ञोऽग्रे वर्द्धापनिका दत्ता, हे राजन् अयं योगिशिरोमणिः पुरुषः कथयति यदहं राजपुत्रीं निरामयां करिष्यामीति. तद् ज्ञात्वातीवहृष्टेन राज्ञा सोंबडो नीजपुत्र्यावासे नीतः, अतीवसन्मानितश्च. 

पश्चात्कथितं भो योगिराज इमां मत्सुतां सज्जीकुरुत? राज्ञेति कथिते सत्यंबम्डेन दिनत्रयं यावद्देवताराधनं कृतं. यतः—सन्नायां व्यवहारे च। शत्रुमध्ये तथैव च॥ आडंबरेण पूज्यंते। स्त्रीषु राजकुलेषु च ॥ १ ॥ तदनंतरमंबम्डेन सर्वलोकसमक्षं सा राजकन्या गृहीतनूतनावतारेव सज्जीकृता. तद् दृष्ट्वा विस्मिताः सर्वेऽपि लोकाः परस्परं कथयितुं लग्नाः, यन्नूनमयं योगिराजः सामान्यपुरुषो न. आश्चर्यांदोलितमानसेन राज्ञापि निजपटहोद्घोषणानुसारेणांबडाय निजार्द्धराज्यं दत्तं, महोत्सवेन च तेन सह निजकन्यायाः पाणिग्रहणं कारितं. राजलदेवीमातृपितृभ्यामपि निजपुत्र्यंबडाय परिणायिता. अथांबडोऽपि कतिचिद्दिनानि यावत्तत्र सुखेन स्थितः, ततः स्वकलत्रे राज्यार्द्धं च गृहीत्वा स क्रमेण रथनुपुरनगरे समागत्य रत्नमालादिकं सर्वं गोरखयोगिन्या अग्रे मुक्त्वा तस्यै प्रणामं कृतवान्. ततो निजावासे समागत्य स स्वकीयप्रियाभिः सार्द्धं विषयसुखानि भुनक्ति. ॥ इति तृतीयादेशः संपूर्णः ॥

पुनः कतिचिद्दिवसानंतरमंबडो गोरखयोगिन्यै प्रणामं कृत्वा कथयामास, हे मातरधुना मम चतुर्थमादेशं देहि? तदा प्रमोदं प्रपन्ना सती सा वक्ति, हे अंबड नवलक्षाभिधानपत्तने

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बोहित्थगृहे लक्ष्मीर्मर्कटी च विद्येते, ते अत्र समानय? इत्यादेशं प्राप्यांबडोऽथ नवलक्षपत्तनंप्रति चलितः, मार्गे च गछन् स सुगंधनामवनमध्ये प्राप्तः, तत्र स नानाविधवृक्षालिकलितनिकुंजान् प्रमोदमेदुरमानसो विलोकयामास.'इतो बकुलवृक्षघटांतराले तेन विद्युदिव देदीप्यमानकांत्यलंकृतशरीरैका बालिका व्रजंती दृष्टा. अंबडोऽपि यावत्तस्याः पृष्टे व्रजति, तावत्सा बालिका सरोवरस्य पानीयमध्ये भूत्वा कुत्राप्यदृश्या बभूव. अंबडेन लक्षपूर्वकं सर्वत्र विलोकितापि कुत्रापि सा न लब्धा, तदासौ विषादपरो वने भ्रमितुं लग्नः, क्रमेण तस्या विरहतश्च स रुदितुं लग्नः. यतः—

विकलयति कलाकुशलं । हसति शुचिपंडितं विडंबयति ॥ अधरयति धीरपुरुषं । क्षणेन मकरध्वजो देवः ॥१॥ एवं विरहाकुलोऽसौ वनमध्ये दिनानि गमयति. अथैकदिवसे कोऽपि बटुकोंबडस्याग्रे फलं मुक्त्वा प्रणामं च कृत्वा कथयतिस्म, हे अंबड त्वं मया सार्द्धं समागछ? त्वाममरावती निजावासे समाकारयति. तत् श्रुत्वांबडेनोक्तं भो पुरुष केयममरावती? किमिदं च फलं? इति पृष्टे सति तेन बटुकेनारामिकेणोक्तं हे अंबड त्वं शृणु? अग्निकुंडपुरे

॥ ३८ ॥

For Private and Personal Use Only

नगरे देवादित्याभिधानो राजा राज्यं करोति, तस्य लीलावत्याख्या पट्टराझ्यस्ति. तथैवान्या अपि तस्य बह्वयो राझ्यः संति. तयोर्बहवः पुत्राः विद्यंते.

॥ ३९ ॥ अथैकदैकेन कलत्रेण राजा भोजनार्थं निमंत्र्य कार्मणं कृतं, तेन कार्मणेन च राजा शुकरूपो जातः. तदा नगरमध्येऽपि हाहारवो जातः, पश्चात्सा राज्ञी पुत्रैर्विडंबनापूर्वकं देशान्निष्कासिता. परं नृपस्य दुःखेन सकलमपि नगरं सशोकं बभूव. लीलावती पट्टराज्ञी तु तं शुकं निजोत्संगे गृहीत्वातिष्टत्. तदा स शुकोऽवदत्, हे प्रिये सांप्रतं मम काष्टभक्षणं यत्र? एवंविधं नृपस्य वचनं श्रुत्वा पुत्रकलत्रादिसर्वोऽपि परीवारो रुदनं कर्त्तुं प्रवृत्तः. यतः—

रमाराज्यभ्रंशः स्वजनविरहः पुत्रमरणं । प्रियाणां च त्यागो रिपुबहुलदेशे च गमनं ॥ हरिश्चंद्रो राजा वहति सलिलं प्रेतसदने । अवस्था तस्यैषा अहह विषमाः कर्मगतयः ॥ १ ॥

एवं दुःखाभिभूतः शुकरूपभाग् राजा काष्टभक्षणाभिलाषं करोति. ॥ ३९ ॥

तस्मिन्नवसरे आकाशमार्गेण समागतेन कुलचंद्राभिधानेन तपस्विना कथितं, अहो लोका यूयं सर्वेऽपि स्वस्था भवत. अहं नृपं निरामयं करिष्यामि. तस्यैतेन वचनेन सर्वेऽपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोका हृष्टाः. ततोऽनंतरं कुलचंद्रतपस्विना स्वमंत्रशक्त्या सप्तभिर्दिनैर्नृपो मनुष्यरूपोपेतः कृतः. तदा प्रधानैर्मिलित्वा नगरमध्ये महोत्सवो विहितः. ततस्तेन कुलचंद्रतपस्विना राज्ञे वैराग्यमयो धर्मोपदेशो दत्तः. यथा—

संपदो जलतरंगविलोला। यौवनं त्रिचतुराणि दिनानि ॥ शारदाभ्रमिव चंचलमायुः। तज्जनाः कुरुत धर्ममनिंद्यं ॥ १ ॥ इति धर्मोपदेशं निशम्य वैराग्यवासितमानसेन नृपेण स्वपुत्राय राज्यं दत्वा निजराइया सह तापसव्रतं गृहीतं, वनमध्ये च स तपःक्रियां कर्त्तुं लग्नः. एवं कतिचिद्दिवसानंतरं राज्ञा निजपत्नीं सगर्भां दृष्ट्वा तस्यै पृष्टं, भो देवि इदं तपोव्रतदूषणकारकं त्वया किं विहितं? तत् श्रुत्वा लज्जावनतवदनया तया कथितं हे स्वामिन् इयं मे गर्भोत्पत्तिर्गृहवासस्यैव वर्त्तते, तपोव्रतगृहणावसरे च मया धर्मांतरायप्रादुर्भावभयभीतया तत्स्वरूपं भवद्भयो न प्रकटीकृतं. तत् श्रुत्वा राजा मौनमवलंब्य तत्रैव वने स्थितः. संपूर्णदिनैस्तयैका महामनोहररूपधारिणी पुत्री प्रसूता. तदैव राज्ञी तु सूतिकारोगाक्रांता पंचत्वं प्राप्ता.तदनंतरं तपोव्रतव्याकुलमानसेनापि राज्ञा सा वन्यमहिष्यादीनां दुग्धपानपूर्वकं वृद्धिं नीता-

For Private and Personal Use Only

क्रमाच्च तस्या अमरावतीति नाम दत्तं. क्रमेण स्वकीयपितुः पार्श्वादधिगतशास्त्राध्ययना सा यौवनं प्राप्ता. तदा सातीवसौंदर्यवती शचीसमानशरीररूपधारिणी संजाता. तद्यथा—

श्यामेयं स्तनभारमंथरगतिः कंठे च रुद्रावलीं । बिभ्राणा हरिणीविलोलनयना रंभोरुयुग्मान्विता ॥ चंद्रास्या गजगामिनी सुललिता सल्लीलया गच्छति । दृष्ट्वा रूपमिदं तदीयमनिशं वृद्धोऽपि कामायते ॥ १ ॥ अन्यदा सामरावत्याकाशमार्गेण व्रजता धनदेन दृष्टा. तदा तस्या अतिसौंदर्ययुता रूपेण मोहितोऽसौ तत्पाणिग्रहणार्थं तस्यै त्रीणि रत्नानि समर्पयामास, तेषां प्रभावं च तस्यै कथयामास. भो सुभगे एषां मध्यादेकेन रत्नेन जलस्योपद्रवः शाम्यति, द्वितीयेन च रत्नेनाग्नेरुपद्रवः शाम्यति, तृतीयेन च भूतप्रेताद्युपद्रवो न भवति. अथैवं तस्य धनदस्य स्नेहानुरागं ज्ञात्वामरावत्या स धनदो वर्धापितः, कथितं च हे धनद अतः परं त्वं मे सहोदरो वर्त्तसे, तत एभ्यो रत्नेभ्योऽप्यधिकं किमपि मे समर्पय? येन मम कोऽपि पराभवं न करोति. इति कथिते सति धनदेन कामरागं परित्यज्य तस्या उपरि भगिनीभावोंगीकृतः. ततस्तुष्टेन धनदेन तस्याः कृते सजलं सरोवरं कृत्वा तज्जलमध्ये महामू-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्रव्यस्तैः परिपूर्ण एक आवासो विनिर्मितः. तदा तेन तपस्विना राज्ञा नतिपूर्वकं धनदः पृष्टः, हे धनद अस्या मे प्राणवल्लजाया अमरावत्याः पुत्र्याः को वरो जविष्यति? धनदेनाप्यवधिज्ञानेन ज्ञात्वा कथितं हे तपस्विन् अस्या अमरावत्या महाकलावानंबडनामा वरो जविष्यति. तदा ऋषिणा पृष्टं स कथं ज्ञास्यते?

धनदेनोक्तमितः सप्तमेऽह्नि सोंबडोऽत्र बकुलवृक्षांतराले अमरावत्या दृष्टिपथं समायास्यति. अतो हे अंबड त्वमद्य तूर्णममरावत्या आवासे समागड? तेनेत्युक्ते सति अंबडोऽपि तेनारामिकेण सार्द्धममरावत्या आवासे समागतः. अमरावत्यापि स्वासनमोचनपुरस्सरं तस्मै सिंहासनमुपवेशनकृते दत्तं, तदनंतरं तया तस्य बहुविधसन्मानपुरस्सरं प्रतिपत्तिः कृता, परस्परं नानाविधा प्रीतिवार्त्ता कृता. ततोंबडेनामरावती पृष्टा, जो सुलोचने स तव पिता राजर्षिः कुत्रास्ति? मम च तस्य मिलनेछा वर्त्तते. इत्यंबडेन कथिते सति अमरावत्यारामिकायोक्तं जो बटुक त्वं शीघ्रं गत्वा मे तातमत्र समानय? तत् श्रुत्वा स बटुको यावद्गंतुं प्रवृत्तस्तावदंबडोऽपि तेन सार्द्धं तत्र गंतुं सज्जो बजूव. अमरावत्या वार्यमाणोऽपि रत्नानि त-



For Private and Personal Use Only

त्र मुक्त्वांबमो बटुकपृष्टे जलमार्गेण गंतुं लग्नः, एवं जलमध्ये गच्छन्नंबडस्तूर्णमेकेन मत्स्येन गलितः, स मत्स्योऽप्येकेन बकेन गलितः, बकोऽप्येष गृध्रपक्षिणा ग्रस्तः, स गृध्रोऽप्यंबरे उत्पतितः. इतो बटुकेन पश्चाद्विलोकितं, परमंबडो न दृष्टः. तदनंतरं तेन स जलमध्ये शोधितः, परं तत्रापि स न लब्धः, अथ शोकातुरेण बटुकेनांबडस्य तत्स्वरूपममरावत्यै ज्ञापितं, तत् श्रुत्वा साप्यत्यंतं खिन्ना सती अचेतनीभूय मूर्छां प्राप्ता. तद्वृत्तांतं श्रुत्वा तस्य पिता राजर्षिस्तत्र समायातः, तथाविधां मूर्छामापन्नां निजपुत्रीं दृष्ट्वा सोऽपि शोचितुं लग्नः, पश्चात्तेन शीतलोपचाराद्यैः सा सचेतनी कृता. तदामरावती लज्जिता सती तारस्वरेण रुदितुं प्रवृत्ता. मुनिना प्रबोध्यमानापि सा स्वकीयं शोकं न त्यजति. यतः—दिन जाये जणवत्तमी। पण रतमी नवी जाय ॥ एक रागी ने रोगीयां। सहज सरीखां थाय ॥ १ ॥ एवं सामरावती सदा शोकव्याकुलमानसैव स्वकीयं कालं गमयांचकार.



अग्रेतोऽसौ गृध्रपक्षी बहुभाराक्रांतो व्याकुलीबभूव, ततोऽसौ कस्यापि वृक्षस्योपरि स्थितः सन् तेन मार्गेण गच्छतैकेन व्याधेन दृष्टः, तदा तेन व्याधेन स बाणं मुक्त्वा हतः, तदा

गृध्रेण बको मुक्तः, बकेन च मत्स्यो मुक्तः, तदा व्याधो मत्स्यं गृहीत्वा विदारितवान्. तदा तस्य मत्स्यस्य जठरान्मनुष्यो निःसृतः, एवं तत्र मनुष्यं दृष्ट्वाऽसौ व्याधोऽपि मनसि चमत्कृतः सन् तं बहिर्निष्कास्य जलेन क्षालयामास, क्रमेण स शीतलवायुना सावधानो जातः. तदांबडेन तस्य व्याधस्याग्रे निजः सर्वोऽपि वृत्तांतो निवेदितः, तदा तं महापुरुषं ज्ञात्वा व्याधोऽपि निजगृहे समानीय भोजनादिना तस्य प्रतिपत्तिं कृतवान्. अथैष व्याधो नवलक्षपत्तने वसति, अंबडोऽपि दिनमेकं तत्र स्थितः, इतो व्याधपुत्र्येका मध्यरात्रौ गृहान्निर्गता, तत्पृष्टेंबडोऽपि तस्याश्चेष्टां विलोकयितुं बहिर्निर्गतः.

ततो मार्गे तया व्याधपुत्र्यैका नागिनीनाम्नी क्षत्रियपुत्री समाहूता, द्वितीया सोहीनाम्नी वणिक्पुत्री समाहूता, तृतीया रामतीनाम्नी द्विजपुत्री च समाहूता. ततस्तया व्याधपुत्र्या ताभ्यः सर्वाभ्यः कथितं, हे सख्योऽद्य चतुष्पथे गत्वा बोहित्थगृहे गम्यते. तयेति कथिते सति ताः सर्वा अपि चतुष्पथे समागताः, ततस्ताभिः सर्वाभिरपि स्वकीयानि छागीरूपाणि कृतानि, तद् दृष्ट्वांबडेनापि छागरूपं कृत्वा ताः सर्वा अपि त्रासिताः. ततस्त्रस्ताः सत्य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्ता निजनिजगृहे गताः. प्रज्ञाते परस्परं मिलिताः सत्यः कथयामासुर्हे सख्यो गतरात्रिवृत्तांतस्य स्वरूपमस्माभिः सम्यग् न ज्ञातं. अथ तस्य स्थिरमनसा गवेषणं कार्यं. एतासामयं वार्त्तालापोंबडेन प्रच्छन्नवृत्त्या श्रुतः. अथ रात्रौ पुनस्तथैव ताश्छागीरूपं विधाय मिलिताः, तदांबडेनापि स्वीयमजरूपं कृत्वा ताः स्तंभिताः. तदा ताभिर्भक्तिपूर्वकमजरूपभृदंबडंप्रति कथितं, हे देव त्वं कस्मात्कारणादस्मान् विप्रतारयसि? मुधा विडंबनां च कुतः करोषि? यत्कथनीयं भवेत्तदस्मभ्यं कथय? परमस्मान्मुंच? एवंविधानि तासां दीनवचनानि श्रुत्वाऽजरूपोंबडोऽवदत्, हे सुलोचना यदि यूयं ममैकं कार्यं साधयेत तदा युष्मान्मुंचामि, तदा ताभिरुक्तं त्वं सुखेन तव कार्यं कथय?

तदांबडेन कथितं, अत्रैव नवलक्षाभिधानपत्तने बोहित्थस्य रूपिणीनाम्नी पुत्री वर्त्तते, तस्या मिलनाय मम वांछास्ति, अतो मां तत्र बोहित्थगृहे मुंचत? ताभिरुक्तं तत्तव कार्यं वयं करिष्यामः, इति श्रुत्वांबडेन ता मुक्ताः, ताभिरपि छागरूपधारिणोंबडस्य बोहित्थगृहं दर्शितं. तद्बोहित्थगृहं परितो जलखातिकावेष्टितं. ताम्रमयप्राकारपरिकलितं, सप्तभूमिकोच्छ्रितं, पंच- ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







सहस्रसुवर्णटैर्वेष्टितं, रत्नमयदीपैरुद्योतितं ध्वजपताकायुतं च तेन दृष्टं. तत्र कनकमयगृहमध्ये तेन नवलक्ष्मीर्मंडिता दृष्टा, तस्याः समीपे च तेनैका मर्कटिकापि विलोकिता. अथ ताश्चतस्रश्चागयः पंचमश्चाजः सर्वेऽपि तदावासमध्ये गताः, तान् दृष्ट्वा बोहित्थपुत्र्या रूपिण्या ताभ्यश्चतुर्भ्यः कथितं हे सख्यः अद्येदं विप्रतारणं किं? एषोऽजो युष्माकं पूर्वं मया नैव दृष्टोऽस्ति, तत एव तत्संबंधिनीं पृच्छां करोमि?

ताभिः सर्वाभिः कथितं हे सखि त्वया यज्जल्पितं तत्सत्यं, नूनमेष नवीनोऽजोऽस्ति, परं हे पापिष्टे एनमजमस्मत्सत्कं कथं कथयसि? अलीकं मा वद? अनेनाजेन तव स्वरूपमस्मदग्रे सर्वमपि निवेदितमस्ति. पुनर्मार्गेऽप्यनेन वयं भृशं विडंबिताः स्मः, तत् श्रुत्वा भयभ्रांता रूपिणी तमजंप्रति कथयामास हे अज? त्वं तव सत्यं स्वरूपं कथय? आत्मरूपं च प्रकटीकुरु? तदांबडेनाप्यवसरं विज्ञाय स्वकीयं मनुष्यरूपं प्रकटीकृतं.

तस्यातिमनोहरं रूपं दृष्ट्वा मोहितया रूपिण्या कथितं हे स्वामिन् त्वं कः? तदांबडेनोक्तमहं गोरखयोगिनीप्रसादात्सिद्धोऽस्मि, सर्वमपि विश्वं मम हस्ते वर्त्तते. तत् श्रुत्वा चम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्कृतया रूपिण्योक्तं हे स्वामिन्नतः परमहं तव स्वाधिनास्मि, मम योग्यं कार्यं निवेदय?

तदांबडेन कथितं हे रूपिणि तर्ह्येनां तव लक्ष्मीं चेमां मर्कटीं मे समर्पय? तत् श्रुत्वा तयोक्तं हे सिद्धपुरुष ते तुभ्यं दास्यामि, परं प्रथमं त्वमस्या मर्कट्याः संबंधं शृणु? मयैकदा स चंडदेव आराधितः, तेनापि ममोपरि प्रसन्नीभूयेयं मर्कटी मे दत्ता, तस्याः प्रभावश्च कथितः, हे वत्से अस्यां मर्कट्यां तव समीपे स्थितायां तव सौभाग्यं भविष्यति, कोऽपि पराभवं न करिष्यति, परमस्या मर्कटिकाया वियोगे तव मरणं भविष्यति, तेन कारणेन हे सिद्धपुरुष यत्राहं तत्रेयं मर्कटिकापि स्थास्यति, पुनरेषा मर्कटिका प्रतिदिनं मम नवनव रत्नानि ददाति, तानि रत्नानि च लक्षद्रव्यमूल्यानि संति. अतः कारणात्प्रथमं त्वं मम पाणिग्रहणं कुरु? यथेयं मर्कटिका मया सार्द्धं समागच्छेत्. तत् श्रुत्वांबडेन कथितं एतद्वृत्तांतं त्वं तव पित्रोरग्रे निवेदय? रूपिण्योक्तं एवं सहसैव मम मातापितरौ इदं विवाहकार्यं कथं मन्येतां, यतः—सहसा विदधीत मा क्रिया—मविवेकः परमापदां पदं ॥ वृणुते हि विमृश्यकारिणं । गुणलुब्धाः स्वयमेव संपदः ॥ १ ॥ अतः सहसैवैवं विवाहकार्यकथनं मया ता-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यां कथं कथ्यते? प्रपंचेन विना कार्यं न सिद्ध्यति.

तत् श्रुत्वांबमेनोक्तं तर्ह्यस्य कार्यस्योपायं कथय? तदा रूपिण्योक्तं हे स्वामिन् प्रथमं त्वं अजविद्यां गृहीत्वा नगरमध्ये गत्वा मलयचंद्रनृपस्य वीरमतीनाम्नीं पुत्रीं परिणय? तदनु अहमपि तव पाणिग्रहणं करिष्यामि. अंबमेनापि तत्प्रतिपन्नं. तदनंतरं शीघ्रमंबमोऽपि तामजविद्यां गृहीत्वा नगरमध्ये प्रविष्टः. तदवसरे मलयचंद्रराजापि तेन तुरगमारूढो मार्गे गछन् दृष्टः, तत्कालमेवांबमोऽजविद्यां मुक्त्वा राजानमजरूपं चकार. तदा नगरलोका अपि राजानमजरूपधारिणं विलोक्य शोकातुराः संतः परस्परं कथयंतिस्म, अरे अद्य केनापि पापिष्टेन नृपंप्रति कार्मणं कृतं, एवं सर्वेऽपि लोकाश्चलचित्ता बभूवुः. राजगोत्रिणां भयेन प्रधानेनापि नगरप्रतोलिर्मुद्रिता, व्याकुलीभूता लोकाः परस्परं कथयामासुर्न जानीमहे यदद्य किं भविष्यतीति. एवं दुःखव्याकुलीभूतं नगरलोकं विलोक्यांबडेनापि स्वकीयमनस्यागतमवसरं विमृश्य बहुरूपिणीं विद्यां स्मृत्वा आसमंतान्नगरस्य चतुरंगं सैन्यं विकुर्वितं. पश्चादंबडेन स्वकीयसुभटान् शिक्षयित्वा नगरद्वारे प्रहिताः, सुभटैरपि तत्र गत्वा द्वारपालेभ्यः कथितं, भो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्वारपालाः प्रतोलीद्वारं कथं नोद्घाटयथ? अस्माकं स्वामी सकलकलावान् रथनुपूरनगरान्न-
वन्नगरविलोकनार्थं समागतोऽस्ति.

तत् श्रुत्वा द्वारपालैस्तत्स्वरूपं प्रधानाय निवेदितं, पश्चात्प्रधानैरपि प्रतोलिरुद्घाटिता, सैन्यं च सर्वं नगरमध्ये समागतं. प्रधाना अप्यंबडं नमस्कृत्योपविष्टाः, अंबडेनापि ते सर्वे प्रधानाः सन्मानिताः. ततोंबडेन पृष्टं भो प्रधानाः नगरमध्ये इदं सर्वमसमंजसं कथं जातमस्ति? प्रधानैरपि स्वदुःखवार्त्ताबडस्याग्रे निरूपिता. उक्तं च—विरला जाणंति गुणा । विरला पालंति निद्धणा नेहा ॥ विरला परकज्जकरा । परदुक्खे दुक्खिआ विरला ॥ १ ॥ तत् श्रुत्वांबडेनोक्तमेषा वार्त्ता तु स्वल्पैवास्ति, दर्शयत तूर्णमेव मे राजानं, तत्कालमेवाहं तं नीरोगं करिष्यामि. परमस्मिन् कार्ये मम को लाभो भविष्यति? प्रधानैरुक्तं भो अंबड यदा राजा मनुष्यरूपधारी सावधानीभूतो भविष्यति तदा वयं तुभ्यमर्द्धं राज्यं राजकन्यां वीरमतीं च दापयिष्यामः पश्चादंबडेनापि अजीभूतो राजा विद्याप्रभावान्मनुष्यरूपीकृतः, प्रधानैश्च मिलित्वा राज्ञेंबडस्य स्वरूपं ज्ञापितं. तुष्टीभूतेन राज्ञापि निजार्द्धं राज्यं वीरमती कन्या चां-



For Private and Personal Use Only

बम्हाय दत्ता. पश्चात्तत्रैवांबडेन रूपिण्यादिपंचकन्यानामपि पाणिग्रहणं कृतं. ततोंबडः स्वकीयं सकलं धनादि गृहीत्वा सुगंधवनमध्ये समागतः, तत्र तेनामरावती विलापं कुर्वंती दृष्टा, तदांबडोऽपि तत्र वने रुदितुं प्रवृत्तः. एवं तत्र तं रुदंतं दृष्ट्वारामिकेण सह स राजर्षिस्तत्र समागतः, इत आरामिकेणांबम्ह उपलक्षितः, अंबडेनापि ऋषये नमस्कारं कृते सति ऋषिणापि तस्मै आशिर्वादो दत्तः, तत ऋषिणांबम्हस्याग्रे अमरावत्या दुःखस्य वार्त्ता कथिता, तत् श्रुत्वांबडोऽपि मनसि दुःखी बभूव.

अथ ऋषिणापि तद्दुःखनिवारणार्थं तस्यामरावती परिणायिता. एवममरावत्यापि स्वकीयदुःखाय जलांजलिर्दत्ता. अंबम्हेनापि ततः स्वकीयसर्वस्त्रीमध्येऽमरावती पट्टराज्ञी कृता. अथांबम्हस्तस्य राजर्षेराज्ञां गृहीत्वा प्रमोदपरः परिवारयुतो निजनगरंप्रति चलितः, तत्रागत्य च गोरखयोगिन्या अग्रे सर्वं मुक्त्वा तेन सा नमस्कृता. तदा तयापि कथितं भो अंबड नूनं त्वं वीरशिरोमणिरसि, अंबम्हेनोक्तं हे मातर्भवत्प्रसादात्. इति कथयित्वा स स्वस्थाने समागत्य सुखेन राज्यं कृतवान्. ॥ इति चतुर्थादेशः समाप्तः ॥

अथ कतिचिद्दिवसानंतरं पुनरप्यंबडो गोरखयोगिनीसमीपे समागत्य पंचममादेशं मार्गयामास. तदा योगिन्योक्तं भो वत्स इतः सौराष्ट्रमंडले देवपत्तने देवचंद्राभिधो राजा राज्यं करोति, तस्य वैरोचननामा प्रधानो वर्त्तते, तस्य गृहे च रविचंद्राभिधानो दीपकोऽस्ति, तं दीपकं गृहीत्वा त्वमत्र समागच्छ? इत्यादेशं प्राप्य अंबडो मार्गे चलितः, क्रमेण स सौराष्ट्रदेशमध्ये प्राप्तः, इतो मार्गे तस्यैको विप्रो मिलितः, अंबडेन तस्य पृष्टं हे विप्र त्वं कुत्र गच्छसि? कुतः स्थानाच्चागतोऽसि? द्विजेनोक्तमहं देवपत्तनात्समागतोऽस्मि, मम वृत्तांतं शृणु? उत्तरदिग्विभागे महादुर्गनामा पर्वतोऽस्ति, तस्य पार्श्वे सिंहपुरीनाम्नी नगरी वर्त्तते. तत्र सागरचंद्राभिधो राजा राज्यं करोति, तस्य समरसिंहाख्यः पुत्रः, पुत्री च रोहिणीनाम्नी वर्त्तते. स सागरचंद्रो राजा परकायप्रवेशिनीं विद्यां जानाति. अथ राज्ञा स्वकीयं वृद्धत्वं विलोक्य निजपुत्राय राज्यं दत्तं. तस्मिन्नवसरे रोहिण्या पुत्र्या नृपस्याग्रे कथितं हे तात ममापि किंचित्सुखभक्षिकां देहि? तत् श्रुत्वा राज्ञा स्वपुत्र्यै परकायप्रवेशिनी विद्या दत्ता, कथितं च हे वत्से त्वं यावत्कस्मैचित्पात्रायैतां विद्यां न ददासि तावन्निजबांधवं विनाऽन्यस्य क-

स्यापि नरस्य त्वया मुखं नावलोकनीयं. यस्मै च नराय त्वमिमां विद्यां यच्छेस्तस्यैव त्वया पाणिग्रहणं विधेयं, एवंविधा प्रतिज्ञा त्वया पालनीया; इति शिक्षां दत्वा कियता कालेन तस्याः पिता मरणं प्राप्तः.

अधुना तस्मिन्नगरे तस्या भ्राता समरसिंहो राज्यं करोति, सा कन्या च निजपितुः शय्यां पालयति, सा कन्या कदाचित्पर्वते, कदाचिद्गुहायां कादाचिच्च स्वावासे तिष्ठति. अतस्तस्याः सकाशात्परकायप्रवेशिनीं विद्यां गृहीतुमहं तत्र गच्छामि. तत् श्रुत्वांबडेन विप्रंप्रति कथितं भो विप्र तव पार्श्वे किं कापि विद्या वर्त्तते? यत्तत्र गच्छसि? यतः—विनयेन विद्या ग्राह्या । पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या । चतुर्थं नैव दृश्यते ॥ १ ॥ तत् श्रुत्वा विप्रेणोक्तं मम पार्श्वे मोहिनी विद्यास्ति. तां विद्यां तस्यै दत्वा तत्पार्श्वादाकाशगामिनीं विद्यामहं लास्यामीति. पुनरंबडेन कथितं कन्याया दर्शनं विना त्वं विद्यां कथं गृहीष्यसि? यतः—ग्रामो नास्ति कुतः सीमा । पत्नी नास्ति कुतः सुतः ॥ प्रज्ञा नास्ति कुतो विद्या । धर्मो नास्ति कुतः सुखं ॥ १ ॥ तत् श्रुत्वा विप्रेणोक्तं प्रपंचो विधास्यते. तदांबडेन कथितं म-

त्समीपेऽक्षयलक्ष्मीकारिणी विद्या वर्त्तते, तत् श्रुत्वा पुनरपि द्विजेनोक्तं तर्ह्यावां स्वकीयस्वकीयविद्ययोः परावर्त्तं कुर्वः. तत् श्रुत्वांबडेनापि तथैव कृतं. अथ तौ द्वावपि मार्गे गच्छंतौ कतिचिद्दिवसानंतरं सिंहपुरनगरसमीपे प्राप्तौ, नगरोद्याने च स्थितौ. तत्रांबडेन विमृष्टं यदहं तस्या राजसुताया ग्रहणाय कपटोपेतमुपायं करोमि. इति विमृश्य तेन ब्राह्मणाय प्रोक्तं यदावाभ्यां पृथक् पृथक् भूत्वा नगरमध्ये गंतव्यं. ब्राह्मणेनापि तत्स्वीकृतं.

अथांबडः प्रतोल्यां प्रविश्य नगरमध्ये गत्वा तपस्विनीरूपं कृत्वा चतुष्पथे स्थितः, ततस्तेन मोहिनीविद्यया नगरवासिलोका व्यामोहिताः, तत्र लोकानामग्रे तया तपस्विन्या कथितं भो लोकाः शृण्वंतु? अहं सर्वप्रकारं निमित्तं जानामि, अथैषा वार्त्ता नगरमध्ये प्रसृता, तेन पूर्वोक्तेन द्विजेनापि श्रुता, ततोऽसौ शीघ्रं तस्यास्तपस्विन्याः पार्श्वे समागत्य प्रस्तावं च प्राप्य भक्तिभारनम्रांगो भूत्वाऽपृच्छत्, हे भगवति? मयि कृपां विधाय त्वं कथय? यन्मम कार्यसिद्धिर्भविष्यति वा न? तेनेति प्रश्ने कृते तया विप्रंप्रति कथितं हे विप्र त्वं विद्यया सहात्र समागतोऽसि, परं सा विद्या ते न प्राप्स्यति, इदं मया कथितं निमित्तं त्वं सत्यं जानी-

हि? तत् श्रुत्वा ब्राह्मणोऽपि साश्चर्यो बभूव. पश्चात्तेन विप्रेणानेके उपायाः कृताः, परं सा विद्या तेन न लब्धा, यतः पुण्यैर्विना विद्या न लभ्यते. उक्तं च—पूर्वदत्तेषु या विद्या । पूर्वदत्तेषु यद्धनं ॥ पूर्वदत्तेषु या कन्या । अग्रे तिष्ठति तिष्ठति ॥ १ ॥ अथ स द्विजोऽत्यंतं खेदं प्राप्तः सन् ततो निर्गत्य स्वदेशे गतः. अथ तया नृपपुत्र्या रोहिण्यापि तस्यास्तपस्विन्या निमित्तज्ञानसंबंधिनी वार्त्ता श्रुता, यन्नगरमध्ये काप्येका महाविचक्षणा तपस्विनी समागतास्तीति. ततस्तया राजकन्यया निजदास्यै कथितं यत्तां तपस्विनीं त्वमत्र तूर्णमानय? तत् श्रुत्वा सा दास्यपि चपलं तस्यास्तपस्विन्याः पार्श्वे समागत्य कथयामास, हे मातर्युष्मान्नृपपुत्री रोहिणी समाकारयति, यतः सा भवतां दर्शनं कर्त्तुं समुद्यतास्ति, किंच सा राजकुमारी सकलकलाप्रवीणास्ति. अतस्त्वां कलावतीं विज्ञाय सा भवद्दर्शनमभिलषति. शास्त्रेऽप्युक्तं—हंसा रज्जंति सरे । भमरा रज्जंति केतकीकुसुमे ॥ चंदनवने भुअंगा । सरसा सरसेण रज्जंति ॥ १ ॥

इति दास्या वाक्यं श्रुत्वा हर्षिता सती सा तपस्विनी तत्र गमनाय समुत्थिता. क्रमेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च रोहिण्याः पार्श्वे गता, रोहिण्यपि तां सुरूपां सालंकारां सुलक्षणां च दृष्ट्वात्यंतं हृष्टा सती तस्याः सन्मानादिपूर्वकं बहुविधां प्रतिपत्तिं चकार, ततस्तां सुवर्णमयसिंहासने समारोप्य सा कुशलवार्त्तामपृच्छत्. अथ तया भोजनार्थं निमंत्रिता सती सा स्वकीयं निरीहत्वं प्रकटीचकार, कथयामास च हे राजसुते अस्मिन्नसारे संसारे जीवानां सुखकारणं धर्म एव ज्ञातव्यः. यतः—रम्येषु वस्तुषु मनोहरतां गतेषु। रे चित्त खेदमुपयासि कथं वृथैव ॥ पुण्यं कुरुष्व यदि तेषु तवास्ति वांछा। पुण्यैर्विना न हि भवंति समीहितार्थाः ॥ १ ॥ एवं धर्मोपदेशं श्रुत्वा राजसुतया प्रोक्तं हे तपस्विनि भवत्या यौवनसमये एव वैराग्यवृत्तं कथं गृहीतं? तस्य कारणं कथय? तदा तपस्विन्योक्तं हे राजसुते एषा वार्त्ता त्वया न पृष्टव्या. परं राजसुताया अतीवाग्रहं दृष्ट्वा तयोक्तं शृणु? सुरीपुरनगरे सूरसेनो राजा, तस्य माणिकीनाम्नी पुत्री, सा चाहं त्वया ज्ञातव्या. मम माता च मे बाल्ये वयस्येव मृता, एवं मातरं विनाहं दुःखिनी जाता. यतः—बालस्स मायमरणं। भज्जामरणं च जूव्वणारंभे॥ बुढस्स पुत्तमरणं। तिन्निवि दुक्खाइं गुरुआइं ॥ १ ॥ ततः पित्राहमध्ययनार्थं लेखशालायां मुक्ता. तत्राध्ययनं कु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्वत्यहमेकदा माणिभद्राभिधेन विद्याधरेण दृष्टा.

तेन मदनपरवशेनाहं गगनमार्गेण वैताढ्यपर्वते नीता, तत्र च तेनाहं गौरीप्रज्ञप्त्याख्य-विद्याद्वयं पाठिता. तदनु स मम पाणिग्रहणसमुत्सुको जातः. तस्मिन्नवसरे तस्य पुत्रेण सु-भद्रवेगेन स्वपिता विनाशितः, विद्याधरमध्ये हाहारवो जातः. अथ स सुभद्रवेगोऽपि मम रूपं दृष्ट्वा मोहितः. तदा किरणवेगाभिधविद्याधरेण सोऽपि व्यापादितः. एतत्स्वरूपं दृष्ट्वाहं म-द्रूपंप्रति धिक्कारं कुर्वंती मरणार्थं वनमध्ये गता, तत्र चोपकंठवर्त्तिमहद्वृक्षैका वापी मया दृ-ष्टा, तदा मया हृदि चिंतितं, यदस्य वृक्षस्योपरि चटित्वा वापीमध्ये झंपा दातव्या. इतः कि-रणवेगविद्याधरेण तत्रागत्य झंपापातं कुर्वंत्यहं रक्षिता. निजगृहे च मां समानीय स म-या सार्द्धं भोगविलासान् कर्तुं लग्नः. अथान्यदा स विद्याधरनृपो मयान्यस्त्रियामासक्तो दृष्टः, मया निवारितोऽपि स तदकार्यान्न निवृत्तः, तदा मे मनसि वैराग्यभावः प्रादुरभूत. उक्तं च —शास्त्रं सुनिश्चलधिया परिचिंतनीयं । आराधितोऽपि नृपतिः परिशंकनीयः ॥ आत्मीकृता-पि युवतिः परिरक्षणीया । शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वं ॥ १ ॥ इति विचिंत्याहं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



बलेन गगनमार्गेण ततो निःसृत्य गंगायां गत्वा तत्रैव वैराग्यान्मया तापसीत्वं गृहीतं, ततस्तीर्थयात्रां कुर्वत्यहं भ्रमंती सती कियद्भिर्दिनैरत्र समायाता; हे राजसुते एवंविधो मम संबंधस्त्वया ज्ञातव्यः.

अथ हे सुलोचने त्वमपि ममाग्रे तव स्वरूपं निवेदय? कथं त्वं पुरुषाणां मुखं न विलोकयसीति पृष्टे राजपुत्र्या कथितं हे सखि यदहं पुरुषाणां मुखं नावलोकयामि तद्विषये किंचिदपि महत्कारणं वर्त्तते. तपस्विन्योक्तं तत्कारणं त्वं मे कथयस्व? तदा राजसुतयापि स्वकीयः सर्वोऽपि पूर्वसंबंधस्तदग्रे निवेदितः. ततस्तया राजकन्ययोक्तं हे सखि सा मे प्रतिज्ञाऽद्य त्वयि दृष्टे संपूर्णा जाता दृश्यते, यत्त्वत्सदृशं सुपात्रं मम मिलितं. तेन कारणेन चाहं तव तां विद्यां दास्यामि. तत् श्रुत्वा तपस्विन्योक्तं मम विद्यायाः किमपि प्रयोजनं नास्ति. तथापि राजकुमार्या तस्यै बलात्कारेण सा परकायप्रवेशिनी विद्या दत्ता. पुनस्तया तां तपस्विनीं नमस्कृत्य पृष्टं हे मातर्मयि कृपां विधाय कथय? यद्युष्मत्सदृशो विद्वान कलावांश्च मम को भर्त्ता भविष्यति? इति श्रुत्वा सा तपस्विनी हृष्टा जाता, ततस्तया ध्यानाडंबरं कृत्वा ज्ञान-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्ट्या विलोक्य कथितं हे राजकन्येऽतीवरम्यं तव भाग्यं दृश्यते, स्तोकदिनमध्ये तव योग्यो भर्त्तात्रागमिष्यति. तत् श्रुत्वा राजकुमार्योक्तं स कथं ज्ञास्यते? तस्य किमप्यभिज्ञानं कथय? तदा तपस्विन्योक्तं भो सुलोचने तवारामिकहस्तेन यः कोऽपि ते पुष्पकंचुकं प्रेषयिष्यति स ते भर्त्ता त्वया ज्ञातव्यः. इत्यभिज्ञानं त्वया ज्ञातव्यं. ततस्तपस्विन्या कथितं हे वत्से अथाहं मम स्थानकं प्रति व्रजामि. यतोऽस्मादृशां तपस्विजनानां गृहस्थैः सहातिसहवासो युक्तो न, उक्तं च—

स्त्री पीयर नर सासरें । संजमियां सहवास ॥ पगपग होय अलखामणां । जो मांहे थिरवास ॥ १ ॥ एवं राजसुतामनुज्ञाप्य सा शीघ्रं ततो निर्गता. ततोंबडेन तपस्विनीरूपं परित्यज्य स्वकीयं रूपं च धृत्वा देवपत्तननगरंप्रति प्रयाणं कृतं. तत्र गत्वा स राज्ञो वनमालिकागृहेऽतिष्टत्. तत्र तेन मोहिनीं विद्यां स्मृत्वा सर्वेषां मोहनं कृतं. तत्रारामिकापुत्री देमतीनाम्नी अंबडस्यातीवसुंदररूपेण मोहिता सती निजमातरंप्रति कथयामास, हे अंब ममानेनांबडेन सह पाणिग्रहणं कारय? तत् श्रुत्वा तयांबडस्याग्रे स्वकीयसुताभिप्रायो ज्ञापि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तः, अंबडेनापि तद्वचनं स्वीकृतं. पुनर्मालिकयांबडंप्रति कथितं जो अंबड त्वं किमपि चमत्कारं दर्शय? यथा नृपादिसर्वलोकाश्चमत्कारं प्राप्नुवंति. अंबडेनोक्तं सर्वमप्यवसरे करिष्यामि. अथ द्वितीयदिने सा मालिकैकं चतुरस्त्रं हारं गृहीत्वा राजसनायां गंतुं प्रवृत्ता, तदांबडेनोक्तं हे आरामिके ममैनं चतुरस्त्रं हारं दर्शय? इत्युक्त्वा तेनारामिकाहस्तात्स हारो गृहीतः, ततस्तं मंत्रेणाभिमंत्र्य तथा तस्मिन् किंचिच्चूर्णादिकं प्रक्षिप्य पुनः स हारस्तेनारामिकायै समर्पितः.

तथैव द्वितीयोऽपि हारस्तेन तथैव कृत्वारामिकायै दत्तः, कथितं च जो आरामिके एतयोर्हारयोर्मध्यादेको हारस्त्वया राजसनायां गत्वा राज्ञे देयः, द्वितीयश्च सचिवाय समर्पणीयः. अथारामिकयापि राजसनायां गत्वा तथैव कृतं, नृपतिमंत्रिभ्यां च तं पुष्पहारमाघ्राय स्वस्वमस्तके मुक्तः, आरामिकापि राजसनातः स्वगृहे समायाता. ततोंबडेन नगरप्रतोल्यां राजमंदिरप्रतोल्यां सचिवगृहप्रतोल्यां च मंत्राभिमंत्रितं चूर्णं मुक्तं, तच्चूर्णप्रनावाच्च तास्त्रयोऽपि प्रतोल्यः कंपितुं लग्नाः, तद्दृष्ट्वा बहवो लोकास्तत्र मिलिताः, परस्परं च कथयितुं ल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्ना, नूनमिदमसमीचीनं दृश्यते, एके वदंति नगरस्य किंचिदपि विरूपं नविष्यति, नूतप्रेतय- क्षराक्षसादिमध्यात्कोऽपि रुष्टो विलोक्यते. एवं प्रतोलीकंपनेन तत्र कोऽपि न तिष्ठति. सर्वेऽपि लोका नयभ्रांताः संजाताः, लोकैश्च नृपभुवने गत्वा पूत्कृतं, हे राजन् रक्ष रक्ष स्वनगरं, हतप्रतिहतं संजातं,

इति कथयित्वा लोका यावद्विलोकयंति तावन्नृपप्रधानौ पुष्पप्रनावेण निश्चेष्टौ मूर्छां प्रपन्नौ दृष्टौ. एवं सर्वेऽपि नगरलोका अनाथा बनूवुः. राजलोकैर्वैद्यानाहूयानेके उपचाराः कृताः, परं तयोः सावधानत्वं न संजातं. अथ द्वितीयदिने नृपप्रधानौ शृगालवत् शब्दं कर्त्तुं लग्नौ, लोका अपि शोकातुराः समीक्ष्य तदाश्चर्यं विलोकयामासुः. अथ तृतीयदिने तौ नग्नौ नूत्वा पूत्कुर्वंतौ जनैर्दृष्टौ, तौ बुंबारवं कुर्वंतौ लोकानां पुरो विरूपं जल्पतः. चतुर्थे दिने च तौ कर्दमै रजोन्नी रक्षान्निश्च स्नानं कर्त्तुं लग्नौ, लोकानां प्रत्यपि कर्दमादीनामाछोटनं कुरुतः. पंचमे दिने प्रधानो मृदंगं वादयति नृपश्च नृत्यं करोति. षष्टे दिने च तावन्योऽन्यमालिंग्य रुदनं कर्त्तुं लग्नौ. अथ सप्तमेऽह्नि अंबडेन तस्यै आरामिकायै पृष्टं नो आरामिके नगरम-



For Private and Personal Use Only

ध्ये लोकानां व्याकुलता कथं दृश्यते? तत् श्रुत्वारामिकयोक्तमेतत्सर्वं तवैव विलसितं ज्ञायते, अतः कृपां विधायैनं सर्वमुपद्रवं त्वं निवारय? सांप्रतं लोकैस्तव चमत्कारो दृष्टोऽस्ति.

तदांबडेन सर्वा अपि ताः प्रतोल्यो निश्चलाः कृताः, तदा लोकैर्ज्ञातं ध्रुवमयं कोऽपि सिद्धपुरुषोऽस्ति. तद् ज्ञात्वा सर्वेऽपि राजलोकाः संमील्यांबडसमीपे समागताः, कथितं च तैः हे सत्पुरुष नगरं राजादिकं च रक्ष रक्ष? तदांबडेन गदितं जो लोकाः अहं सर्वमपि जानामि, सर्वं च स्वस्थं करोमि, परं यूयं यदि मम वांछितं यच्छथ. लोकैरुक्तं जो सिद्धपुरुष वयं सर्वमपि तव वांछितं दास्यामः. तदांबडेन तेषां पार्श्वादर्द्धं राज्यं राजसुतायुतं याचितं, पुनः प्रधानगृहसत्को रविचंद्राभिधो दीपकोऽपि याचितः. लोकैरपि तत्सर्वं प्रतिपन्नं. यतः—धनधान्यप्रयोगेषु । विद्यासंग्रहणेषु च ॥ आहारे व्यवहारे च । त्यक्तलज्जः सुखी भवेत् ॥ १ ॥ एवंविधं लोकानां निश्चयं ज्ञात्वांबडेन निजकलया आडंबरं विधाय नृपप्रधानौ स्वस्थौ कृतौ. तदा नगरमध्ये लोकैर्महोत्सवो विहितः, ततस्तैः सर्वैरपि मिलित्वा नृपप्रधानाग्रेंबडस्य सर्वोऽपि वृत्तांतो ज्ञापितः, एवं निःशेषं वृत्तांतं ज्ञात्वा नृपोऽप्यत्यंतं हृष्टः सन् स्वार्द्धराज्ययुतां नि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जपुत्रीं मदिरावतीं तस्मै दत्तवान्. वैरोचनमंत्रिणापि अंबडाय स्वकीयं रविचंद्राख्यं दीपकं तस्मै प्रदाय तेन सह निजपुत्री करमंजरी विवाहिता. पश्चादंबडेन मालिन्याः पुत्री देमत्यपि परिणीता.

एवं महोत्सवपूर्वकं कतिचिद्दिनानि तत्र स्थित्वांबडो निजमर्द्धं राज्यं गृहीत्वा स्वकलत्रैर्युतः सिंहपुरसमीपे समागतः. तत्र चासौ वनमध्ये स्थितः, तत्र द्वितीयदिने तेन स्कंधधृतैकमृतकमनुष्यकलेवरा विलपंती यांत्येका वनिता दृष्टा. तां दृष्ट्वांबडेन तत्पार्श्वे समागत्य पृष्टं, भो सुभगे त्वं का? कुतः कारणाच्च रुदनं करोषि? तत् श्रुत्वा तयोक्तं हे सत्पुरुष मम रुदनकारणं त्वं शृणु? अहमारामिकासुता, मातृपितृभ्यां च नगरमध्ये परिणायिता, क्रमेणैकश्च मम पुत्रो जातः, अकदाहं पितृगृहे मातापित्रोर्मिलनार्थं गता, इतः पश्चान्मे पुत्रो मृतः, एवमकस्माद्दैवेनाहं दंडिता, अथैवं पुत्रमरणदुःखेनातीवदुःखिताहमेतेन मम पुत्रेण सार्द्धं काष्टभक्षणं करिष्यामि. एतद्व्यतिकरं श्रुत्वांबडेन वनमालिकांप्रति गदितं रे मूर्खे मरणात्कोऽपि न छुटति. यतः शास्त्रेऽप्युक्तं—नो ब्रह्मा नेंद्र ईशः शशधरतपनौ नापि नारायणो-

For Private and Personal Use Only

ऽसौ । नापीष्टा लोकपालाः सुरपतिसहिता नापि बुद्धो न चार्हन् ॥ आकृष्टं कालपाशे जीवमथ विवशं सर्वचैतन्यशून्यं । व्याघ्राघ्रातं ह्यरण्ये पशुमिव विवशं त्रातुमेते न शक्ताः ॥१॥

तत् श्रुत्वा मालिकासुतयोक्तं भो सत्पुरुष त्वमेतत्सर्वमपि सत्यं कथयसि, परमहं मे प्राणवल्लभस्य पुत्रस्य मरणसमये समीपे नाभूवं, ततस्तेन सह मया मनाग् वार्त्तालापोऽपि न विहितोऽस्ति; तत्संबंधि मे मनसि महद्दुःखं वर्त्तते. तत् श्रुत्वा पुनरंबडेन कथितं भो सुलोचने यदि मृतोऽप्ययं तव पुत्र एकवारं त्वया सह वार्त्तालापं कुर्यात्तदा त्वं काष्टभक्षणाभिलाषं त्यजेर्वा न? तत्श्रुत्वा तयोक्तं हे सज्जन यद्येवं भवेत्तर्हि मे काष्टभक्षणाभिलाषंप्रति नूनं जलांजलिं यच्छामि. तत् श्रुत्वांबडेन तन्मृतकं तत्र प्रदेशे स्थापितं, ततः परकायप्रवेशविद्ययांबडेन तस्मिन् कलेवरे प्रविश्य मात्रा सह पुत्र आलापितः, पुत्रेणोक्तं भो मातः त्वं कथं रुदनं करोषि? अहं तु स्वकर्मणैव मृतोऽस्मि, त्वं समाधिना गृहे तिष्ट? इति कथयित्वा पुनरपि स पुत्रो मरणं प्राप्तः.

अथ सा वनमालिकांबडं निजगृहे समानीय विविधप्रकारैर्भक्तिपूर्वकं सन्मानयामास.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततोंबडेन वनमालिकायै पृष्टं त्नो सुन्नगे नृपमंदिरे तव गमनागमनं विद्यते न वा ? तयोक्त- मदं सर्वदा नृपमंदिरे पुष्पादिदानार्थं गच्छामि. अथ नगरमध्ये एवंविधा वार्त्ता लोकेषु प्रसृता, यदत्र कोऽपि महागुणवान् राजपुत्रः समेतोऽस्ति, येनारामिकाया मृतोऽपि पुत्रो जीवापितः. अयं लोकवादो नृपपुत्र्या रोहिण्यापि श्रुतः. अथ यदा सारामिका रोहिण्याः समीपे पुष्पाद्यादाय समागता, तदा तयापि तस्याः पार्श्वात्तत्संबंधी सर्वोऽपि वृत्तांतोऽधिगतः, आरामिकयापि तस्यांबडक्षत्रियस्यातीवप्रशंसा कृता. तत् श्रुत्वा रोहिणी सहर्षा जाता, कथितं च तया तस्यै यदंबडाय मे प्रणामो वाच्यः. आरामिकापि गृहं समागत्यांबडस्याग्रे राजसुतायाः प्रणामं निवेदयामास. अथ द्वितीयदिने आरामिकया सार्द्धमंबडेन राजकुमारीरोहिण्यर्पणकृते पुष्पमय एकः कंचुकः प्रेषितः, तदा रोहिण्यापि तपस्विन्या वचनं सत्यं विज्ञाय स्वभ्रातुर्विज्ञप्तं हे भ्रातरथ मम पाणिग्रहणमनेनांबडेन सह कारय? तत् श्रुत्वा प्रमुदितेन तस्या भ्रात्रापि तस्याः पाणिग्रहणं महोत्सवपूर्वकमंबडेन सह कारितं.

अथांबडो निजकलत्रैर्युक्तः स्वनगरं प्रति चलितः, कतिचिद्दिनैः कुशलेन स गोरखयो-



For Private and Personal Use Only

गिनीसमीपं समागत्य रविचंद्राख्यदीपादिवस्तु तदग्रे मुक्त्वा तस्यै प्रणामं कृतवान्. तदा सा योगिन्यपि संतुष्टा सती तस्यातीवप्रशंसां चकार. पश्चादंबडोऽपि निजावासे गत्वा सुखेन राज्यलीलां कुर्वन् स्वकलत्रैः सह सुखानि भुनक्ति. ॥ इति श्रीअंबडचरित्रे गोरखयोगिन्या दत्तः पंचमादेशः संपूर्णः ॥

अथ पुनः कतिचिद्दिवसानंतरमंबडो गोरखयोगिनीसमीपे समागत्य प्रणामपूर्वकं षष्टमादेशं प्रार्थयामास. तदा योगिन्या प्रोक्तं भो अंबड सौवीरदेशे सिंधुनामा पर्वतोऽस्ति, तत्र च कोडिन्ननाम नगरं वर्त्तते, तस्मिन् देवचंद्राभिधो राजा राज्यं करोति. तत्र वेदवेदांगपारंगामी सोमेश्वरनामा ब्राह्मणो वसति. तस्य गृहे च सर्वार्थसिद्धिनामा दंडो वर्त्तते, तं दंडं त्वमत्रानय? इत्यादेशं प्राप्यांबडोऽपि तन्नगरमार्गे चलितः, अग्रे गछतस्तस्य तटिन्येका समागता, यावदंबडस्तत्तटिनीतटसमीपे समायातस्तावत्तेनैकं कौतुकं दृष्टं.

एकः कदलीपत्राछादित उटजो नदीजलोपरि तरन् सन् समागछन् दृष्टः, तस्य पृष्टभागे चैको रक्तपालसदृशो योगी उपविष्टो दृष्टः, उटजमध्ये च रविकिरणानीवात्यंतं देदी-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ष्यमानैका सुकुमाला मृगी दृष्टा, तां मृगीं स योगी व्यजनेन वीजयन् दृष्टः. अथांबडस्तत्स्वरूपं विलोक्य साहसं धृत्वा स्वकीयं महद्रूपं विकुर्व्याकाशे चोत्पत्य तं योगिनं चरणे गृहीत्वांबरे उल्लालयामास. ततस्तेन स जटजो जलोपरि स्तंभितः, अथ गगनोल्लालितेन तेन योगिना सहांबडो युद्धं कर्त्तुं लग्नः, क्षणादेव चांबडेन स योगी व्यापादितः. पश्चात्तेनोटजस्तटिनीतटे समानीतः, तन्मध्ये पश्यता तेन सुवर्णशृंखलया बद्धा मृगी दृष्टा, तथैव तत्र स्वर्णमयपुरुषो रत्नमयकुंडलद्विकं श्वेतरक्तवर्णोपेतं च कंबायुग्मं दृष्टं. तानि वस्तूनि दृष्ट्वांबड आश्चर्यं प्राप्तः, ततस्तेन प्रथमं रक्तकंबया सा मृगी ताडिता. तदैव सा निरुपमरूपोपेता रंभासमाना सर्वालंकारालंकृता नवयौवना प्रमदा संजाता. तां दृष्ट्वांबडो चमत्कृतः सन् मोहदशां प्राप्तश्चिंतयामास—अमृतस्य तु कुंभानि । सुधैवामरिकाणि हि ॥ रतेरेव प्रधानेयं । प्रमदा केन निर्मिता ॥ १ ॥ सर्वेषामत्र रत्नानां । स्त्रीरत्नं हि मनोरमं ॥ तदर्थं धनमिच्छंति । तत्त्यागेन धनेन किं ॥ २ ॥ अथांबडेनैषा बालिका पृष्टा, भो चंद्रवदने का त्वं? योगिनो हस्ते च कथं समागता? तथैवैषां स्वर्णपुरुषादीनां च सत्यं वृत्तांतं कथय? अंबडेनेति पृष्टे स-



For Private and Personal Use Only

ति सा बालिकाश्रुकलितलोचना कथयितुं प्रवृत्ता. हे परोपकारिशिरोमणे हे गुणाकर त्वमस्मद्वृत्तांतं शृणु? बंगदेशे भोजकटकं नाम नगरं, तत्र वैरिसिंहाभिधो राजा, तस्याहं सुता ज्ञातव्या. अथैकदाहं विपरीतशिक्षिततुरंगसमारूढा पितुरादेशाद्रसविलासकूपंप्रति पारदस्याह्वानार्थं चलिता. तावदहं वनेऽनेन योगिना दृष्टा. स योगी मदीयं रूपं दृष्ट्वा व्यामोहितः सन्नेकदा राजसभायां समागतः, तत्र च तेनैकः केलिस्तंभः प्रकटीकृतः, तदा राज्ञा स योगी आसनदानादिना प्रचूरं सत्कृतः, सर्वकलासमन्वितं तं योगिनं दृष्ट्वा सकलापि सभा चमत्कृता.

अथ राज्ञा तस्मै योगिने समादिष्टं हे योगिराज यूयं कमपि चमत्कारं दर्शयत? राज्ञेति कथिते सति योगिना गदितं हे राजन् यदि तव चमत्कारविलोकने कौतुकं विद्यते तर्ह्येनं केलिस्तंभं त्वं विदारय? तत् श्रुत्वा राज्ञापि तथैव कृतं. तत्कालं केलिस्तंभमध्यादेका नवयौवना सालंकारा सुरूपा देवांगनासदृशा च कन्या निःसृता. तां कन्यां दृष्ट्वा चमत्कृतेन राज्ञा योगिनंप्रति कथितं हे योगींद्र इदं किमिंद्रजालं वा सत्यं? योगिनोक्तं हे राजन् इदं सर्वं सत्यमेवास्ति. अस्याः कन्याया वृत्तांतं त्वं शृणु? एषा कन्या मणिवेगविद्याधरस्य पु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्री रत्नमालाभिधाना त्वया ज्ञातव्या. एषा च राजपुत्री मया तव पाणिगृहणार्थमेवात्र समानीतास्ति, परं प्रथमं त्वयैकं मम कार्यं कर्त्तव्यं. तत् श्रुत्वा राज्ञा गदितं हे योगिन् तव किं कार्यमस्ति? तत्कथय? योगिनाप्युक्तं हे राजन् मम साधनक्रियाया उत्तरसाधकार्थमष्टमीदिने संध्यासमये श्रीपर्णानदीतटवर्त्तिवनमध्ये तव पुत्र्या रत्नवत्या सार्धं त्वयागंतव्यं. राज्ञापि मुग्धत्वात्तत्प्रतिपन्नं. ततः स योगींद्रः स्वस्थाने गतः, अथासौ वृत्तांतो मंत्रिभिः श्रुतः, तदा मंत्रिभिर्मिलित्वा राज्ञे कथितं हे स्वामिन् युष्माभिरिदं किं कृतं? एवंविधा योगिनो महानिर्दया धूर्त्ताश्च भवंति, अतो युष्माभीरत्नवत्या सह तत्र गमनं युक्तं न.

तदा राज्ञोक्तं भो मंत्रिणः युष्मदुक्तं सत्यमेव, परं मया तस्मै वचनं दत्तमस्ति, अतः किं क्रियते? यतः—राज्यं यातु श्रियो यांतु परं निजवचनात्प्रच्यवनं सज्जनानां श्रेयस्करं न. अतो यद्भावि तद्भविष्यति, परं वाचः स्खलितो नैव भविष्यामि. इतः स योगींद्रो नृपमाकारयितुं तत्र समायातः, राजापि तेन सार्द्धं गंतुं सज्जोऽभूत्. एवमेकाकिनं नृपं गमनाय सज्जीभूतं विलोक्य योगिना कथितं. अरे राजन्! त्वया सार्द्धं तव पुत्रीं कथं न गृह्णासि? राज्ञो-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्तं न्नो योगींद्र तस्यास्तत्र किं प्रयोजनमस्ति? सा तु सुखेनात्रैव तिष्टतु. तत् श्रुत्वा योगिना मनाकू क्रोधाम्बरं कृत्वा प्रोक्तं हे राजन् यदि त्वं तव वाचा भ्रष्टो न्नविष्यसि तर्हि तव किमपि विघ्नं न्नविष्यति. किंच तां कुमारीं विना मे विद्या सिद्धिं न प्रयास्यति.

तत् श्रुत्वा राज्ञा न्नयन्नीतेन निजपुत्र्यपि सार्थे गृहीता. अथ स योगींद्रस्ताभ्यां सह श्रीपर्णातटीनीतटे गतः, तत्र वनमध्यात्तेन श्वेतरक्तवर्णोपेते द्वे कंबे गृहीते. ततः स योगी पर्वतांतर्गुहायां गतः, तत्र गुहायां चैकमग्निकुंडमासीत्. तस्मिन्नग्निकुंडे स होमं कर्त्तुं लग्नः, तदा मम पिता ज्ञातं, नूनमत्र किमपि विपरीतं न्नविष्यति, परं स तत्र किमपि पराक्रमं कर्त्तुं शक्तो नासीत्. अथ मां स योगी निजोटजमध्ये नीतवान्, तत्र च मां श्वेतकंबयाहत्य तेन मृगीं विधाय स्वर्णशृंखलया बद्धा. ततोऽसावग्निकुंडपार्श्वे समागत्य मे पितरं कथयामास, हे राजन्नथ त्वमिदं गुटिकात्रयमत्राग्निकुंडमध्ये क्षिप? तथा मां नमस्कृत्येति कथय? यन्मम सान्निध्यतोऽस्य योगींद्रस्य विद्याः सिद्ध्यंतु. राज्ञापि तथैव कर्त्तुं स्वीकृतं. अथ प्रणामं कुर्वन् मम पिता तेन दुष्टेन योगिनोत्पाद्य शीघ्रमेवाग्निकुंडमध्ये क्षिप्तः, तत्कालमेव म-



For Private and Personal Use Only

म पिता प्रज्ज्वल्य स्वर्णपुरुषरूपो जातः. एवं तेन निजकार्यं साधयित्वा स्वर्णपुरुषादिकमिदं सर्वं संग्रह्य मदुपेतोऽयमुटजो नदीजलोपरि चालितः. मार्गे चात्र त्वं मिलितः, त्वया च योगिनं व्यापाद्य ममोपरि महदुपकारं विधाय मम पितृसत्कं वैरं वालितं. तत् श्रुत्वांबडेनोक्तं हे सुलोचने अयं सर्वोऽपि वृत्तांतो मया ज्ञातः, परं कुंडलवृत्तांतं कथय? तदा रत्नवती तत्संबंधिवृत्तांतं कथयितुं प्रवृत्ता. हे वीर मार्गे गच्छता तेन योगिना तद्वृत्तांतो मह्यमेवं कथितः.

एकदा मया कालिकादेवी समाराधिता, तया सुप्रसन्नीभूय मह्यमेतत्कुंडलद्वयं दत्तं. तयोः कुंडलयोर्महिमा चैवं कथितः. यद्येकं कुंडलमाकाशे मुच्यते तर्हि वर्षैकं यावत्तच्चंद्रवदुद्योतं करोति, द्वितीयं कुंडलं च यद्याकाशे मुच्यते तर्हि वर्षद्वयं यावत्तत्सूर्यवदुद्योतं करोति. एवंविधं राजकुमार्योक्तं सर्वं वृत्तांतं श्रुत्वांबडेन स्वकीयं स्वरूपं प्रकटीकृतं. तस्य देदीप्यमानं दिव्यं रूपं निरीक्ष्य मोहिता सा राजकुमारी चिंतयामास, नूनमयं सामान्यपुरुषो न, इति विमृश्य तयांबडंप्रति जल्पितं हे स्वामिन् यूयं मम पाणिग्रहणं कुरुत? अंबडेनापि गांधर्वविवाहेन तस्याः पाणिग्रहणं कृतं. ततः पुनरपि रत्नवत्योक्तं हे स्वामिन् संप्रति मम पि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुर्नगरे गम्यते, तत्र मे भ्राता समरसिंहोऽस्ति, तस्य मम पितुर्वृत्तांतः कथनीयः, यथा स युक्त्या निजराज्यरक्षां कुर्वीत. तत् श्रुत्वांबडो रत्नवतीं गृहीत्वा व्योममार्गेण तत्र नगरे समायातः, तदा तेन परचक्रेण वेष्टितं तन्नगरं दृष्टं. तद् दृष्ट्वा रत्नवत्योक्तं हे स्वामिन् गोत्रिणो मिलित्वा राज्यं गृहीतुं समागता दृश्यंते. अतो यूयं निजशक्त्या मम भ्रातू राज्यस्य च रक्षणं कुरुत? तत् श्रुत्वांबडो निजं विकरालं महद्रूपं विकुर्व्य मुद्गरं च हस्ते गृहीत्वाकाशमार्गेण तान् रिपून्प्रति धावितः. एवं राक्षसतुल्यं तस्य महाभयंकरं रूपं दृष्ट्वा ते सर्वेऽपि गोत्रिणः स्वकीयजीवं गृहीत्वा निजं चतुरंगं सैन्यं च तत्र त्यक्त्वा प्रणष्टाः. ततो रत्नवती नगरमध्ये गत्वा निजबांधवं समरसिंहंप्रति अंबडस्य निखिलमपि वृत्तांतं ज्ञापयामास. तत् श्रुत्वा समरसिंहो महोत्सवपूर्वकमंबडं नगरमध्ये प्रवेशयामास. ततोंबडेन समरसिंहाय तन्निखिलं राज्यं दत्तं; समरसिंहेनापि अंबडोपकारं मत्वा तद् गृहीतं. पश्चात्समरसिंहेनापि महोत्सवपूर्वकं निजभगिनी रत्नवत्यंबडेन सह परिणायिता. अंबडोऽपि सुखेन कतिचिद्दिनानि यावत्तत्र स्थितः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथैकदिने स रात्रिपाश्चात्यन्नागे रत्नवतीं सुप्तां मुक्त्वांबडो गगनमार्गेण कूर्मक्रोडनगरपरिसरे गत्वा लोकानामपृच्छत्, न्नो लोका अत्र सोमेश्वरद्विजस्य गृहं कुत्रास्ति? लोकैरुक्तं न्नो पथिक सोमेश्वराभिधाना अत्र नगरे प्रचुरा द्विजा वसंति. तत् श्रुत्वा खिन्नोंबडस्तत्र कामदेवयक्षस्य प्रासादे स्थितः, परं रात्रौ सोमेश्वरद्विजशोधनचिंतया तस्य निद्रा न समागता. ततोऽसौ प्रासादमध्ये सर्वत्र निजदृष्टिं प्रसारयामास. इतो मध्यरात्रौ तस्मिन् प्रासादे तन्नैका युवती प्रविशंती दृष्टा, तां दृष्ट्वा हृदि चमत्कृतोंबडोऽपि तस्याश्चरित्रं विलोकयितुं प्रच्छन्नवृत्त्या तत्र स्थितः. अथ तां युवतीं समागच्छंतीं दृष्ट्वैका प्रासादस्तंन्नस्था पाषाणमयी पुत्तलिका क्रोधातुरा न्नूमौ प्राप्ता, तया तस्यै युवत्यै कथितं न्नो चंद्रकांते अद्य त्वमत्सूरं कृत्वा कथं समागता? इति पृष्टे सति तया गदितं हे सखे मत्पिता सोमेश्वरो नृपपार्श्वादद्युनैव गृहे समागतः, तेन कारणेन च ममात्सूरं जातं. ततः सा पुत्तलिका चंद्रकांतया सह नृत्यं कर्तुं प्रवृत्ता.

अथ कामदेवस्याग्रे यावत्सा विनोदं कर्तुं प्रवृत्ता, तावदंबडेन हास्यं कृत्वा कथितं, हे



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बालिके युवां किं कुरुथः? इति कथयित्वा त्रासिते सत्यौ ते नयनीते जाते, ततश्चंद्रकांतयोक्तं हे सत्पुरुष त्वं कः? अंबडेनोक्तमहं पाश्चिमात्यः पथिकोऽस्मि, पुनस्तया पृष्टं तवाभिधानं किमस्ति? अंबडेनोक्तं ममाभिधानं पंचशीर्षः. अथ पुत्तलिकया निजसखींप्रति प्रोक्तं हे सखि यदि त्वमागच्छेस्तर्ह्यावामद्य वासवदत्ताया गृहे गच्छावः, तदा चंद्रकांतयोक्तं यदि गम्यते तदा वरं, परं नः सारथिः कोऽपि न दृश्यते, पुत्तलिकयोक्तमेष पथिक एव नौ सारथिर्भवतु. तत् श्रुत्वा चंद्रकांतया पंचशीर्षंप्रति प्रोक्तं भो पंचशीर्ष त्वमावयोः सारथीभूय किं समागच्छसि? पंचशीर्षेणोक्तं युवयोः कुत्र गमनेच्छा वर्त्तते? ताभ्यामुक्तं आवां पाताले गमिष्यावः,' तत् श्रुत्वा पंचशीर्षेणोक्तं तर्ह्यहमपि युवयोः सारथीभूय तत्रागमिष्यामि, परं युष्माभ्यां मह्यं मनोवांछिता विद्या दातव्या. तत् श्रुत्वा ताभ्यां तत्प्रतिपन्नं.

अथ तं पंचशीर्षं सार्धं गृहीत्वा ते प्रासादाद्बहिरागते. तत्रांबकेन बालक्रीडायोग्यैका शकटिका वृषभरहिता दृष्टा, तस्यां च ते उभे अप्युपविष्टे. पश्चात्ताभ्यामंबडाय कथितं भो पंचशीर्ष त्वमस्याः शकटिकायाः सारथित्वं गृहाण? तत् श्रुत्वा तेनोक्तं वृषभौ विना सारथि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं गृहीत्वा किमहं करिष्यामि? ताभ्यामुक्तमत्रार्थे तव का चिंतास्ति? तत् श्रुत्वासौ चमत्कृतः सन् शकटिकायां सारथिस्थाने समुपविष्टः. पश्चादंबडेन सा शकटिका निजविद्यया स्तंभिता. तद् दृष्ट्वा ताभ्यां कथितं भो सारथे त्वया शकटिका कथं स्तंभिता? तदांबडेनोक्तं मह्यं शकटिकाचालनमंत्रं समर्पयतं? अंमनेति कथिते ताभ्यां तस्मै स मंत्रो दत्तः. पश्चात्सा शकटिका वेगेन ततश्चलिता, क्रमेण च वासवदत्ताया गृहे गता. तदा वासवदत्तापि सन्मुखं समागता. ताः सर्वाः परस्परं संमील्य गृहमध्ये समायाताः, वासवदत्तया तयोरासनदानादिपूर्वकं सत्कारः कृतः. ततस्तया ताभ्यां फलपुष्पपत्राणि दत्तानि, ताभ्यामपि तत्सर्वं स्वकीयसारथये दत्तं. तदा वासवदत्तया प्रोक्तं भो सख्य एषः पुरुषः कोऽस्ति? ताभ्यामुक्तमेष आवयोः सारथिस्त्वया ज्ञातव्यः.

अथ तस्मिन्नवसरे नागश्रीनाम्न्यैकया सख्या तासां निजगृहे आकारणार्थं स्वसेवकः प्रहितः, तत्सेवकात्तद्वृत्तांतं श्रुत्वा वासवदत्तया ताभ्यामुक्तं भो सख्यौ यदि युवयोरिछा तर्हि अद्य नागश्रियो गृहे गम्यते. तदा ताभ्यामपि तत्स्वीकृतं. क्रमेण ताः सर्वा अपि सारथिना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सह तत्र समायाताः, नागश्रियापि तासामतीवसत्कारः कृतः. अथ तत्र चंद्रकांतया सारथये कथितं, त्वं सर्वासामपि पत्रबीटकान् देहि? तत् श्रुत्वांबडेन पत्रबीटकमध्ये पूर्वोक्तफलचूर्णं प्रक्षिप्य सर्वासामपि बीटका दत्ताः. तत्प्रभावात्ताः सर्वा अपि बालिका मृगीरूपाः संजाताः, पातालमध्ये हाहारवः संजातः, ततोंबडो मृगीरूपां चंद्रकांतां समादाय नगरमध्ये समागतः, तदनंतरमंबडेन मुक्ता सा मृगीरूपा चंद्रकांता निजगृहे समागता.

अथायं विचित्रो वृत्तांतो राजभुवने गतः, लोकै राज्ञोऽग्रे प्रोक्तं भो स्वामिन् तव पुरोहितपुत्री मृगीरूपा जातास्ति, तत् श्रुत्वा विस्मितो राजा राजमंदिराद्बहिरागतः, तत्र तेन वृषभरहितां शकटिकां वाहयन्नंबडो दृष्टः, चमत्कृतेन राज्ञा तंप्रति पृष्टं भो सिद्धपुरुष त्वं वृषभौ विनैव शकटिकां केन प्रकारेण वाहयसि? त्वं किं कोऽपि देवो वा विद्याधरोऽसि? राज्ञेति पृष्टे सत्यंबडोऽवादीत्, हे राजन्नहं विद्याधरोऽस्मि, तत् श्रुत्वा राजादिभिर्लोकैस्तस्मै कथितं, भो विद्याधर तर्हि त्वं निजस्वरूपं प्रकटीकुरु? इति प्रोक्ते सत्यंबडेनात्मस्वरूपं प्रकटीकृतं. तदा तस्यातिमनोहरं रूपं दृष्ट्वा सर्वेऽपि लोकाश्चमत्कृताः. ततो राज्ञा तस्मै तन्मृगी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वरूपं ज्ञापितं, तदांबडेनाज्ञातीभूयोक्तं हे राजन् एतदर्थं मम किमपि प्रयोजनं नास्ति.

तथापि राज्ञा तं प्रभावान्वितं विज्ञाय भक्तया महताग्रहेणोक्तं हे परोपकारिन् त्वं मम पुरोहितसोमेश्वरगृहे समागत्य मृगीभूतां तस्य पुत्रीं स्वभावरूपां कुरु? ततोंबडस्तस्यां शकटिकायामुपविश्य सोमेश्वरगृहे समातगतः, तत्र तेन मृगीरूपां चंद्रकांतां विलोक्य नृपपुरोहितादिभ्यः कथितं, यद्यहमेनां स्वभावरूपां करोमि तर्हि मे किं दास्यथ? राज्ञोक्तं तवेप्सितं वस्तु दास्यामः, ततोंबडेन गदितमस्य सोमेश्वरद्विजस्य गृहमध्ये सर्वार्थसिद्धिनामा दंडोऽस्ति, स दंडो मह्यं समर्पणीयः. राजादिभिः तदंगीकृतं. ततोंबडेन रक्तकंबयाहत्य चंद्रकांता स्वरूपभाक् कृता.

सोमेश्वरेणापि हृष्टेन सर्वार्थसिद्धिदंडसमेता सा कन्यांबडाय परिणायिता. ततश्चंद्रकांताया वचनतस्तेन पाताले गत्वा तास्त्रयोऽपि कन्याः स्वभावभाजो निर्मिताः. ततोंबडश्चंद्रकांतयायुतः कोडिन्ननगरे समागत्य देवचंद्रनृपस्याज्ञां गृहीत्वा भोजकंटकनगरे प्राप्तं सर्वं वस्तुजातं गृहीत्वा स्वकीये रथनूपुरनगरे समागतः, तत्र गोरखयोगिन्यग्रे सर्वं मुक्त्वा तेन सा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमस्कृता. योगिन्यपि हृष्टा सती तमतीव प्रशंसयामास. अथांबडोऽपि योगिनीं नमस्कृत्य स्वगृहे समागतः, तत्र च स नानाविधानि सुखानि भुनक्ति. ॥ इति षष्ठ आदेशः समाप्तः ॥

पुनः कतिचिद्दिवसानंतरं गोरखयोगिनीसमीपेंबडः समागत्य नतिपूर्वकं सप्तममादेशं मार्गितवान्, कथितं च हे मातरस्य सप्तमादेशस्य करणेन मे प्रतिज्ञाधुना संपूर्णा भविष्यति. तत् श्रुत्वा हृष्टया योगिन्योक्तं हे वत्स त्वं शृणु? दक्षिणदिशि सोपारकनगरे चंद्रीश्वराभिधो राजा राज्यं करोति. तस्य नृपस्य मुकुटमध्ये यद्रत्नमस्ति तद्रत्नं त्वमत्रानय? अंबडोऽपि तमादेशं संप्राप्य तां च नमस्कृत्य ततश्चलितः. क्रमेण च सोपारकनगरसमीपे समागतः. तत्रैकं पत्रपुष्पफलाद्युपेतं वनं दृष्ट्वा तत्फलानि गृहीतुं स वनमध्ये प्रविष्टः. ततः फलगृहणाय यावत्स स्वकीयं हस्तं वृक्षशाखायां क्षिपति, तावत्तत्र स्थितेनैकेन वानरेण तस्मै प्रोक्तं, भो सत्पुरुष प्रथमं त्वं ममैकं वाक्यं शृणु? पश्चाद्यथेच्छं त्वं फलानि गृह्णीयाः. यदि चेत्प्रथमं त्वं फलं गृह्णासि तदा ते विरूपं भविष्यति. तत् श्रुत्वांबडः क्षणमेकं मौनं स्थितः, पश्चात्तेन जल्पितं, हे कपे त्वं किं वाक्यं मे वदसि? तदा वानरेणोक्तं शृणु?—

For Private and Personal Use Only

हे साहसिन्नस्या वाटिकाया दक्षिणपार्श्वे तुंबगिरिनामा पर्वतोऽस्ति, तस्य पृष्टे चैकः सहकारवृक्षो वर्त्तते, तस्य फलं गृहीत्वा पश्चादस्य फलपत्रादि गृहाण? इति श्रुत्वांबडोऽपि विस्मितः सन् विनोदार्थं तत्र गतः तत्र च यावत्तत्सहकारफलं गृहीतुं तेन स्वकीयो हस्तः प्रसारितः, तावत्तस्य सहकारवृक्षस्य शाखा ऊर्ध्वं गता. तद् दृष्ट्वांबडस्तस्य सहकारवृक्षस्योपरि चटितः. तत्कालमेव स सहकारवृक्षस्ततो गगने समुत्पतितः. एवं व्योममार्गे च भ्रांत्वा स वृक्षो नंदनवनमध्ये गत्वा स्थितः. तदांबडोऽपि तस्मादध उत्तरितः सन् यावद्दिगावलोकनं करोति तावत्समीपे तेनैकोऽग्निकुंडो दृष्टः.

तथैव तत्र तेन बहुपुरुषस्त्रीणां गमनागमनं दृष्टं. मृदंगानां गंभीरारावाः श्रुताः. तत्सकलं दृष्ट्वाश्चर्यान्वितोंबडो यावत्तद्विलोकयति, तावत्तत्रैको विविधालंकृत्यलंकृतशरीरो दिव्यरूपः पुरुषः समागतः. तेन पुरुषेणांबडस्य पार्श्वे समागत्य हास्यं कृत्वा पृष्टं भोः सत्पुरुष स वानरः सहकारश्च कीदृशः? तत् श्रुत्वातीवविस्मितोंबडस्तंप्रति बभाषे, हे वीर त्वं कः? स वानरः कः? कोवायमग्निकुंडः? अत्र च नाटकं किं? इत्यंबडेन पृष्टे सति स कथयामास,

हे अंबड त्वमेनं व्यतिकरं शृणु? तवाग्रेऽहं सर्वमपि सविस्तरं कथयिष्यामि. पाताललोके लक्ष्मीपुरनाम नगरं, तत्र हंसाख्यो राजा, सोऽहं वानररूपेण कृत्रिमं सहकारं कृत्वा तवाकारयितुं समागत आसम्, अहं च विद्याधरैः प्रहितोऽस्मि. अथास्य नाटकस्य वृत्तांतं त्वं शृणु? अत्र शिवंकराख्यनगरे शिवंकराभिधो राजास्ति, परं तस्य पुत्रो नास्ति. तेन पुत्रार्थमनेके उपायाः कृताः, परं तस्य पुत्रो नाऽभवत्. अथैकदिने तत्र विश्वदीपकनामा तपस्वी समायातः, तं नमस्कृत्य शिवंकरेण राज्ञा पृष्टं हे तपस्विन्नहमपुत्रकोऽस्मि, तेन सर्वदा मम मानसे महद्दुःखं वर्त्तते. यतः—अपुत्रस्य गतिर्नास्ति । स्वर्गो नैव च नैव च ॥ तस्मात्पुत्रमुखं दृष्ट्वा । गृही धर्मं समाचरेत् ॥ १ ॥ अतः कारणात्त्वमेतन्मम दुःखं निवारय? तदा तेन तपस्विना मनसि दयां विधाय तस्य शिवंकरनृपस्यप्रत्येकं फलं दत्तं, तत्प्रभावश्चैवं कथितः—हे राजन् इदं फलं त्वया सकलत्रेण भक्षयितव्यं. अस्य फलस्य प्रभावात्तव नूनं संतानं भविष्यति. अथ तत्फलं राज्ञा राज्ञीमदत्वा केवलं स्वयमेव भक्षितं. तत्प्रभावाच्च कियद्भिर्दिनै राज्ञ उदरमध्ये गर्भोत्पत्तिः संजाता. कर्मणां गतिः केन निवार्यते! यतः—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रामो येन विडंबितो वनगतश्चंद्रः कलंकीकृतः । क्षारश्चांबुनिधिः फणी च सविषो व्यालाकुलं चंदनं ॥ मांकव्योऽपि च शूलकांकितवपुर्भिक्षाभुजः पांडवा । नीतो येन रसातलं बलिरसौ तस्मै नमः कर्मणे ॥ १ ॥ अथ स राजा निजैवंविधासमंजसदशया लज्जितः सन् स्वधवलगृहमध्ये एव तिष्टति, बहिर्लोकानां दर्शनं न दत्ते. अथ साऽसंभ्रविनी वार्त्ता सर्वत्र प्रसृता. लोकाः परस्परं जल्पंति यदिदमकार्यं नृपमकालमरणं दास्यति. अथ सप्तमासानंतरं नृपस्योदरे पीमा समुत्पन्ना, बह्वी चाऽसमाधिर्जाता, तस्य प्राणाः कंठगता बभूवुः. तदा सर्वे विद्याधरा एकत्र मिलित्वा परस्परमालोचयंतिस्म. अहो इदं महत्कौतुकं, यत्पुरुषस्योदरे गर्भोत्पत्तिः संजाता. तदैकेन विद्याधरेण गदितं, अस्य वेदना तदा यास्यति, यदा धरणेंद्रस्य स्मरणं क्रियते. तद्वचनं सर्वैरपि मानितं. पुनरेकेनोक्तमथ धरणेंद्रं कः समाराधयिष्यति? तत् श्रुत्वा शिवंकरनृपस्य भ्रात्रा कथितं, अहमेव धरणेंद्रं समाराधयिष्यामि. तदा सर्वैरप्युक्तं तर्हि त्वं विलंबं मा कुरु? तदा स रम्यदिने धरणेंद्रं समाराधयितुमुपविष्टः, अथ सप्तमे दिवसे धरणेंद्रः प्रत्यक्षीभूय तस्मै कथयामास, कस्मैचित्प्रयोजनायाहं त्वया स्मृतोऽस्मि? तदा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तेनोक्तं हे स्वामिन् मम भ्रातुर्वेदनां निवारय? तत् श्रुत्वा धरणेंद्रश्चैत्यमध्यात् श्रीपार्श्वनाथप्रतिमायाः स्नात्रनीरं समानीय तस्मै समर्पयामास. कथितं च इदं पानीयं तव भ्रातुः पायय? इत्युक्त्वा धरणेंद्रोऽदृश्यो बभूव.

अथ तेन तत्पानीयं निजभ्रातुः पायितं, तत्कालमेव तस्योदरवेदना शमिता. पश्चात्प्रसवकालेऽपि सार्द्धाष्टमासेषु संपूर्णेषु सत्सु तेन पुनर्धरणेंद्रः समाराधितः, तदा धरणेंद्रेणापि पुनस्तस्मै श्रीपार्श्वप्रभुप्रतिमास्नात्रजलं समर्पितं, तज्जलप्रभावाच्च तस्य सुखप्रसवोऽभूत्. चंद्रमंडलसमोद्योतकारी पुत्रः प्रसूतः, अथ नृपस्तु तस्मिन्नवसरे मृतः, ततो धरणेंद्रेण समागत्य स पुत्रो राज्ये स्थापितः, तस्य च धरणेंद्रचूडामणिरित्यभिधानं दत्तं. तस्यार्थं चेदं पातालपुरं धरणेंद्रेण स्थापितं, अग्निकुंडमध्ये च तत्र गमनमार्गो विहितः, लोका अपि सर्वे तेनात्र वासिताः. पुनरत्र धरणेंद्रेण स्वर्णमयं जिनप्रासादं कृत्वा तन्मध्ये सप्रभावा सर्वविघ्ननिवारका श्रीपार्श्वजिनप्रतिमा स्थापिता. पुनः सर्वविद्याधराणां धरणेंद्रेणैवंविधाज्ञा दत्ता. यत् षोडशवर्षादूर्ध्ववयस्को यः कोऽपि विद्याधरश्चतुःपर्व्यामेनां प्रभावान्वितां श्रीपार्श्वनाथप्रति-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




मामनमस्कृत्य न्नोजनं करिष्यति तस्य विद्याभ्रष्टत्वं कुष्टत्वं च न्नविष्यति. ततो धरणेंद्रेण चंद्रकांतमणिमयं सिंहासनं धरणेंद्रचूमामणये समर्पितं. इति कृत्वा धरणेंद्रः स्वभुवने गतः. अतोऽद्याष्टमीदिने विद्याधरा अत्र स्नात्रनाटकादि कुर्वंति. तत् श्रुत्वांबडेनोक्तं तच्चैत्यं मे दर्शय? इत्युक्त्वा तेन सार्द्धं नृपस्तच्चैत्यमध्ये गतः, तत्र च श्रीपार्श्वनाथप्रतिमां विलोक्य स हर्षं प्राप्तः. ततोंबडेन हंसन्नूपंप्रति पृष्टं हे राजन् अस्य देवस्य लक्षणं मे कथय? कथं चानेन देवत्वं प्राप्तमस्ति? इत्यंबमेन पृष्टे सति तेन हंसराज्ञा जन्मादारन्य निर्वाणं यावत् श्रीपार्श्वप्रभुचरित्रं तस्मै निवेदयित्वा कथितं–

न कोपो न मानो न माया न लोन्नो । न लास्यं न हास्यं न गीतं न कांता ॥ न वा यस्य पुत्रो न मित्रं न शत्रु–स्तमेकं प्रपेदे जिनं देवदेवं ॥ १ ॥ इत्यादिबहुन्निः प्रकारैस्तेन सर्वज्ञस्वरूपं तस्याग्रे निवेदितं. तदांबडेनापि सम्यक्प्रकारेण सर्वज्ञं देवं ज्ञात्वा तस्य स्तुतिः कृता. यथा–न वक्त्रं करालं न हस्ते कपालं । न कंठेऽस्थिमाला न हस्तेऽक्षमाला ॥ गले नाहिसंगो न नृत्यंगन्नोगो । जगच्छ्रेष्टमेवं स्तुवे वीतरागं ॥ १ ॥ एवं नवनवप्रकारैः काव्या-




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नि कृत्वांबडेन श्रीपार्श्वप्रभोः स्तुतिः कृता. ततस्तेन प्रभोरग्रे नृत्यं विहितं. तद् दृष्ट्वा सर्वेऽपि विद्याधराश्चमत्कृताः. ततोंबडेन हंसनृपायोक्तं भो राजन्नहमत्र किमर्थं त्वयानीतोऽस्मि? इति पृष्टे सति हंसेनोक्तं शृणु? एकदाऽनेन धरणेंद्रचूडामणिराज्ञा पर्वतिथौ अस्या जिनप्रतिमाया नमस्कारमकृत्वैव भोजनं कृतं, तदादितोऽस्य नृपस्य सर्वा अपि विद्या भ्रष्टाः संजाताः, पुनस्तस्य शरीरे च कुष्टरोगः समुत्पन्नोऽस्ति. तदा राज्ञा स धरणेंद्रः स्मृतः, धरणेंद्रेणापि प्रत्यक्षीभूय तस्मै प्रोक्तं, अरे मूर्ख त्वया कथं ममाज्ञालोपः कृतः? अतःपरमहं तव सान्निध्यं न करिष्यामि. यतः—

आज्ञाभंगो नरेंद्राणां । महतां मानखंडनं ॥ मर्मवाक्यं च लोकाना—मशस्त्रो वध उच्यते ॥ १ ॥ इति कथयित्वा धरणेंद्रोऽदृश्यो बभूव. ततो धरणेंद्रचूडामणिनृपस्य भार्या स्वपतेर्दुःखाच्चतुर्विधाहारस्य प्रत्याख्यानं विधायोपविष्टा. एवं तस्या एकविंशतिदिनानि निराहाराणि गतानि. तदा सापि कंठगतप्राणा संजाता. तदा क्रोधं त्यक्त्वा धरणेंद्रेण तस्यै स्वप्नमध्ये कथितं हे सुंदरि तव पत्युरेकं जीवनोपायं कथयामि तच्छृणु? सोपारकपत्तने देवब्रह्मा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्निधाना वाटिकास्ति, तत्र नालिकेरफलानि गृहीतुमंबडान्निधान एकः सिद्धपुरुषः समागतो-ऽस्ति. तं सिद्धपुरुषं त्वमत्राकारय? यतः सोऽत्रागत्य नृपशरीरात्कुष्टरोगं दूरीकरिष्यति.

अतो हे अंबम तेन प्रयोजनेन मया त्वमत्रानीतोऽसि. तेनेति कथिते सत्यंबमेन सर्वोऽपि स पूर्ववृत्तांतो ज्ञातः. पुनर्हंसेनोक्तमतो हे अंबड संप्रत्यावामत्राग्निकुंममध्ये नूत्वा तत्र लक्ष्मीपुरपत्तने गछावः, इति कथयित्वा सत्वरं तौ तस्मिन्नगरे गतौ. अथांबमेन राजा तत्र कुष्टरोगान्निन्नूतो विलोकितः, ततस्तेन राज्ञः पार्श्वे श्रीपार्श्वनाथप्रतिमायाः पूजा धरणेंद्रस्य च न्नक्तिः कारापिता, दानपुण्यादिकमपि च कारापितं. ततस्तेन जलं मंत्रेणान्निमंत्र्य नृपस्य पायितं, तदा सद्य एव स नृपो नीरोगो जातः. नगरमध्येऽपि महोत्सवः प्रवृत्तः. पट्टराज्ञ्याप्यंबडो वर्द्धापितो, न्नोजनादिना च सत्कृतः. अथ शुन्नदिने धरणेंद्रचूडामणिन्नूपेन स्वपुत्री मदनमंजरी महताम्बरेणांबडेन सह परिणायिता, पाणिमोचनावसरे च तेनांबडाय गजतुरंगमादि प्रचुरं दानं दत्तं. पुनस्तेन धरणेंद्रार्पितं सप्रन्नावं चंद्रकांतमणिमयं सिंहासनमप्यंबडाय दत्तं. अथांबडेन तत्र कतिचिद्दिनानि स्थित्वा बह्वयो विद्या विद्याधरेन्यः शिक्षिताः, ततोंबडो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मदनमंजर्या सह पुनः सोपारकनगरे समायातः, तत्र बहुविधांश्चमत्कारान् दर्शयन् लोकान् स रंजयति, निजकार्यसिद्धिं च विलोकयति. परं स राजभुवनमध्ये प्रवेशं न लभते. इतस्तत्र वसंततुः समागतः, तदा राजा लोकाश्च वनमध्ये वसंतक्रीडां कर्त्तुं गताः. तस्मिन्नवसरे राजपुत्री सुरसुंदर्यपि वनमध्ये क्रीडार्थं गता. तदांबडेनापि तत्र वनमध्ये गत्वा राजकुमारींप्रति मोहिनीविद्या मुक्ता. ततोऽसौ योगिरूपं विधाय सुरसुंदरीसमीपे गतः. तं दृष्ट्वा सा व्यामोहं प्राप्ता, योगी तस्यै आशिर्वादं दत्वाग्रेऽतिष्ठत्, कुमार्यपि साश्चर्यं तस्य सन्मुखं विलोकयति.

ततस्तेन योगिना तस्याः पुरतो बंगकलिंगादिदेशानां विविधा रसमया वार्त्ताः प्रारब्धाः. एवं वार्त्ताः कुर्वता तेन योगींद्रेण विभूतिरभिमंत्र्य राजसुतायै प्रदत्ता, राजपुत्र्यापि सा विभूतिर्निजमस्तके धृता, तदनु स योगींद्रः क्षणमेकं तत्र स्थित्वोत्थितः. तदा नृपसुतापि तेन सार्द्धं समुत्थाय तस्य पृष्टे गंतुं प्रवृत्ता. सखीभिर्निवारितापि सा नातिष्टत्. तदा सखीभिर्नृपस्याग्रे गत्वा तद्वृत्तांतो निवेदितः. तत् श्रुत्वा राज्ञा प्रोक्तं अरे कोऽस्ति सः? यो मम पुत्रीं विप्र-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तारयति. राज्ञेति प्रोक्ते सति सुभटास्तत्पृष्टे धाविताः. तदांबडेन तेषां सुभटानांप्रति मोहिनी विद्या मुक्ता, ततस्ते सर्वेऽपि मोहिताः संतो योगिनः समीपे समुपविष्टाः. ततो राज्ञा तत्र निजसेनापतिः प्रेषितः. योगिनाथ तं सेनापतिं समागछंतं विलोक्य स्वकीयं विकरालं वेतालरूपं विकुर्वितं.

तदा सेनापतिर्भयभीतः सन् नंष्ट्वा नृपपार्श्वे समागत्य तत्स्वरूपं कथयामास. तदा राजा ससैन्यस्तत्र समेत्यांबडंप्रति बाणं मुमोच, परं विद्याप्रभावतोंबडस्यैकमपि बाणं न लगति. तदा राज्ञा ज्ञातं नूनमेषः कोऽपि सिद्धपुरुषो दृश्यते. अथ किं करोमि ? स एवं यावच्चिंतयति तावदंबडेन स्तंभनविद्यया राजादयः स्तंभिताः. ततोंबडेन तस्य मुकुटमध्याच्चूर्णं तद्रत्नं गृहीतं, एवं योगिन्युक्तादेशस्तेन विहितः. राजादयश्च स्तंभितास्तथैव स्थिताः. इतः सुरसुंदरी तत्रागत्य योगिनंप्रति विज्ञप्तिं कर्त्तुं लग्ना, हे सिद्धपुरुष प्रसादं कृत्वा नृपस्य स्तंभनं निवारय? एष मम पिता वर्त्तते. तत् श्रुत्वांबडेन निजविद्यया राजादयः सर्वेऽपि स्तंभनमुक्ताः कृताः, स्वकीयं सुंदरं रूपं च प्रकटीकृतं. तदा तुष्टेन राज्ञा अंबडेन सह निजपु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



त्री सुरसुंदरी परिणायिता, करमोचनावसरे च राज्ञा तस्मै गजतुरंगसुवर्णपटकूलादि प्रचुरं धनं दत्तं. ततोंबडो निजपरिवारयुतः स्वकीयरथनूपुरनगरे समागत्य सर्वं गोरखयोगिन्या अग्रे मुक्त्वा तस्यै प्रणामं कृतवान्. कथितं च हे मातर्मया सप्तापि तवादेशास्तव प्रसादात्संपूर्णा विहिताः. तत् श्रुत्वा तुष्टया योगिन्या तस्मै आशिर्वादो दत्तः, अंबडेनापि तस्या आशिर्वादो मस्तके धृतः ॥ इति सप्तमादेशः संपूर्णः ॥

अथांबडो निजावासे समागत्य स्वकीयद्वात्रिंशद्योषिद्भिः सार्द्धं भोगविलासान् भुनक्ति. तस्यांबडवीर इति भुवि ख्यातिः प्रसृता. एवं स स्वकीयं महाद्विस्तीर्णं राज्यं भुनक्ति, अनेके नृपास्तस्य सेवां कुर्वंति. एवं हे राजन् सोऽयमंबडो मम जनकस्त्वया वेदितव्यः. स मम पिता प्रतिदिनं गोरखयोगिनींप्रति त्रिकालं नमस्कारानकुर्वत्. क्रमेण योगिन्या मम पितुर्विद्यासिद्ध इत्यभिधानं दत्तं. चंद्रावती च मम मातुर्नामास्ति. पुनरहं यदाष्टवार्षिको जातस्तदा चैकदा योगिन्या ध्यानकुंभलिकाधस्तान्मम पित्रे हरिश्चंद्रराज्ञो भांडागारो दर्शितः, तत्राग्निवेतालाभिधो रक्षपाल आसीत्, तेन वेतालेन योगिनीसान्निध्यान्मम पितुरंबडस्योपरि प्रसन्नी-



For Private and Personal Use Only

ञूय स ज्ञांमागारः समर्पितः. तदा मम पित्रापि योगिनीवचनतो धरणेंद्रचूमामणिदत्तं रत्नमयं सिंहासनं तस्मै वेतालाय समर्पितं, स सुवर्णपुरुषश्च तेन ज्ञांडागारे मुक्तः, पुनः स ज्ञांडागारस्तेन तथैव मुद्रितः. हे राजन् एषा वार्त्ता मया मम पितुः पार्श्वात् श्रुता. अथ कालेन सा गोरखयोगिनी दिवं गता, ततो मम जनकस्तस्या वियोगादनाथ इव स्वं दुःखिनं मन्यमानो निजं समयं गमयांचकार. अथान्यदा मम पिता स्वकीयद्वात्रिंशत्कलत्रैः सह क्रीमार्थं वनमध्ये गतः, तत्र तस्य केशिगणधरस्य दर्शनमञ्जूत्. तदा स तुरंगमादुत्तीर्य गणधरं च नमस्कृत्य स्थितः, तदा केशिगणधरेणाप्यंबमंप्रति धर्मोपदेशो दत्तः, धर्मोपदेशं श्रुत्वा प्रमोदं प्रतिपन्नोंबडो गुरून् प्रत्यपृञ्चत्, हे ज्ञगवन् अयं जैनधर्मोऽपि मम शुन्नो दृश्यते, परं स शिवधर्मसमो न ज्ञायते. तदा गणधरेणोक्तं ज्ञो अंबम अद्यापि त्वं कूपमंडुकसदृशोऽसि, त्वया केवलं शिवधर्म एव दृष्टोऽस्ति, अद्यापि त्वया जैनशासनं न श्रुतमस्ति. नक्तंच—

अविदितपरमानंदो । वदति जनो ह्येतदेव रमणीयं ॥ तिलतैलमेव मिष्टं । येन न दृष्टं घृतं क्वापि ॥ १ ॥ अतो हे अंबम त्वया जैनधर्मस्य रहस्यं श्रोतुं युज्यते. इति श्रुत्वांबडेन

गुरुभ्यो विज्ञप्तिं कृत्वा ते स्वकीयभव्यावासे स्थापिताः. तत्र स गुरूणां नित्यं भक्तिं करोति, निरंतरं च गुरुमुखतो धर्मदेशनां शृणोति. क्रमेण गुरुभिस्तस्मै सविस्तरं जैनधर्मोपदेशो द- त्तः. एवं स नित्यं धर्मोपदेशं निशम्य प्रतिबुद्धः सन् सम्यक्त्वं प्राप. तत्सम्यक्त्वं कीदृगस्ति? तदाह—पिधानं दुर्गतिद्वारे । निधानं सर्वसंपदां ॥ निदानं मोक्षसौख्यानां । पुण्यैः सम्यक्त्व- माप्यते ॥ १ ॥ एवंविधं सम्यक्त्वमाहात्म्यं विज्ञाय तेन गुरुमुखतो सम्यक्त्वमूलानि श्राद्ध- स्य द्वादशव्रतानि गृहीतानि. एवं सोंबडवीरो द्वादशव्रतधारी श्रावको जातः. पश्चाद् गुरुमु- खतः श्रीमहावीरप्रभुं विहरमाणं विज्ञाय तेषां वंदनार्थं सोऽतीवोत्सुको जातः. अथ तस्मिन्न- वसरे श्रीमहावीरस्वामिनोऽपि विशालानगर्यां समवसृता आसन्. तत् श्रुत्वांबडस्तत्र गत्वा विधिना वीतरागं नमस्कृत्योपविष्टः. स्वामिनापि मधुरस्वरेण सर्वपापनिवारिणी हृद्यमंदानंद- संदोहदायिनी धर्मदेशना दत्ता. अंबडोऽपि प्रभोर्देशनां निशम्य जिनधर्मोपरि स्थिरचित्तो ब- भूव. ततो जिनं नत्वा तेन प्रभुंप्रति विज्ञप्तं, हे त्रिभुवनाधिप हे केवलज्ञानदिवाकर मम सं- सारस्य पारः कदा भविष्यति? तत् श्रुत्वा श्रीवर्द्धमानस्वामिना प्रोक्तं भो अंबड त्वं भावि-

न्यामुत्सर्पिण्यां द्वाविंशतितमो देवतीर्थकृन्नामा जिनो नविष्यति. इदं श्रीवीरवाक्यं निशम्य स निजहृदयेऽतीवहृष्टः. ततोऽसौ नगवंतं नत्वावदत् हे वीतरागप्रनो युष्मान्निर्मम वंदना नित्यमवधार्या. अथाहं चंपानगरींप्रति व्रजन्नस्मि. तत् श्रुत्वा नगवता प्रोक्तं हे अंबम् तत्र चंपायां नगर्यां तव साधर्मिका सुलसान्निधा श्राविका परिवसति, तस्यै त्वयाऽस्मदीयो धर्माशिर्वादो वाच्यः, सुखसमाधिपूर्वं धर्मध्यानं च पृष्टव्यं. इति स्वामिवचांसि श्रुत्वांबडो हृदि चमत्कृतः सन् चिंतयामास, यस्या अयं सर्वज्ञोऽपि धर्माशिर्वादं वादयति, सा सुलसा श्राविका जिनधर्मविषये कीदृशी दृढा नविष्यति! नूनं तत्र गत्वा मया तस्याः परीक्षा कर्त्तव्या. इति मनसि विचिंत्य स्वामिवचनं प्रतिपद्य स ततश्चलितः. क्रमेण चंपायां समागत्य सुलसायाः सम्यक्त्वपरीक्षार्थं नगर्याः पूर्वप्रतोलीसमीपे स चतुर्मुखं ब्रह्मारूपं विधायोपविष्टः. तदा नगरमध्ये सा वार्त्ता प्रसृता, यदत्र लोकानां नाग्योदयेन ब्रह्मा स्वयमेव समागतोऽस्ति. तद् ज्ञात्वा सुलसांविना सर्वेऽपि नगरलोकास्तत्र समेताः. ततोंबडो द्वितीयदिने पुनरपि दक्षिणस्यां दिशि प्रतोलीनिकटे शिवरूपं कृत्वोपविष्टः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एवं साक्षादीश्वरं समागतं विलोक्य सर्वेऽपि लोकास्तस्मै नमस्कारार्थं समागताः, परं सुलसा न समायाता. तृतीयदिने पश्चिमप्रतोलीपार्श्वे स विष्णुरूपं कृत्वा समुपविष्टः, तदापि सुलसां विना सर्वेऽपि लोकाः समागताः. तदांबडेन चिंतितं नूनमियं सुलसा जिनधर्मे दृढमासक्तास्ति, ततो जिनरूपविधानंविना सा मया नैव प्रतारयितुं शक्यते, इति विचिंत्य तेनोत्तरदिग्द्वारे इंद्रजालविद्यया जिनसमवसरणं विकुर्वितं. तत्राष्टमहाप्रातिहार्ययुतं चतुर्मुखं जिनरूपं कृत्वा स धर्मदेशनां दातुं प्रवृत्तः. लोकानामग्रे च स कथयति अहं पंचविंशतितमस्तीर्थकरोऽस्मि. अथैषा वार्ता नगरमध्ये प्रसृता, लोकाः सुलसायाः समीपे समागत्य तांप्रति कथयामासुः, हे सुलसे सांप्रतं तव देवः पंचविंशतितमस्तीर्थकरः समवसृतोऽस्ति, अतस्तस्य वंदनार्थं त्वं समागच्छ?

इति श्रुत्वा सुलसया चिंतितं कदाचिन्मेरुपर्वतश्चलति, तथापि जिनवचनं नान्यथा भवति, एकस्यां चतुर्विंशतौ चतुर्विंशतिजिना एव भवंति, एवं जिनवचनमस्ति, तदेव सत्यं, लोकास्तु मृषैव वदंति. अहं सद्गुरुं विनान्यस्य प्रणामं भक्तिं च न करोमि, इति विचिंत्य सु-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लसा तत्रापि न ययौ. अथांबडोऽनेन प्रकारेण तस्याः परीक्षां कृत्वा स्वकीयं स्वाज्ञाविकं रूपं विधाय सुलसाया गृहे समागतः, सुलसया तं साधर्मिकं विज्ञाय तस्या विनयादिप्रतिपत्तिः कृता. तत्र सुलसांग्रेबम्नेन प्रोक्तं मया तव सम्यक्त्वपरीक्षायै बहव उपायाः कृताः, परं त्वं न चालिता, नूनं त्वं जिनधर्मे एव दृढचित्तासि. श्रीवर्द्धमानस्वामिना मन्मुखेन या तुभ्यं धर्माशीर्वादिता, तव च प्रशंसा कृता तत्सर्वं युक्तमेव. इत्युक्त्वांबडो निजस्थाने गतः, स सर्वदा त्रिसंध्यं जिनपूजां करोति, निजविद्याभिश्च जिनशासनप्रभावनां करोति. क्रमेण स सम्यग्जिनधर्मं समाराधयन् विंशतिस्थानकानि च समाराध्य तीर्थंकरनामकर्म समुपार्जयामास. पश्चाद् हे राजन् वैराग्यपरायणेन मम पित्रांबडेन मह्यं राज्यं दत्वा सर्वं धनादिकं च मम समर्प्य स्वयं श्रीजिनधर्माराधनतत्परोऽभूत्. प्रांते चाराधनापूर्वकं सोऽनशनं प्रपाद्य समाधिना मृत्वा स्वर्गे गतः. ततो मम पितुर्विरहात्तस्य द्वात्रिंशत्कलत्रैरप्यनशनं कृतं, ता अपि सर्वाः समाधिना कालं कृत्वा व्यंतर्यो जाताः. मोहेन च तस्मिन् भांडागारे सिंहासने ताः सर्वाः पांचालिकारूपेण तिष्टंति.

For Private and Personal Use Only

अथाधुना मम पापकर्मयोगेन मे सकलमपि राज्यं शत्रुभिर्गृहीतं, अहं च निर्धनो जातोऽस्मि. ततो मया चिंतितमधुना स भांडागारो निष्कासनीयो येन मम निर्धनत्वं दूरं यायात्. इति विचिंत्याहं ध्यानकुंमलिकासमीपं प्राप्तः. किंच यावदहं ध्यानकुंमलिकोद्घाटनकृते प्रयत्नं कर्तुं लग्नस्तावन्मया मम माता चंद्रावती प्रत्यक्षरूपेण दृष्टा, तदाश्चर्यं प्रपन्नेन मया मे माता पृष्टा, भो मातस्त्वमत्र कुतः? तदा मे जनन्या गदितं भो वत्स वयं सर्वा अपि स्त्रियो मृत्वा व्यंतर्यो जाताः स्मः, तव पितुर्दिव्यसिंहासने च वयं पांचालिकारूपेण तिष्ठामः. पुनर्हे वत्स त्वमुपक्रमं मा कुरु? तव भाग्यमध्ये लक्ष्मीर्नास्ति, अतः कारणादहं प्रत्यक्षीभूय त्वां निवारयामि, त्वं निजस्थाने व्रज? इति कथयित्वा मे माताऽदृश्या जाता. तत् श्रुत्वा मया ज्ञातं भाग्यं विनोपक्रमः कर्तुं योग्यो न. अतः कमपि भाग्यवंतं पुरुषमग्रे कृत्वेदं कार्यं करोमि, येन तस्य भाग्येनाहं किंचिद्धनं प्राप्नोमि. ततो हे राजन्नहं तव समीपे समागतोऽस्मि. तव भाग्येन च मे धनप्राप्तिर्भविष्यति. तत् श्रुत्वा विस्मितो राजा तेन कुरुबकेन सह तं भांडागारं गृहीतुं ध्यानकुंमलिकासमीपे गतः, यावच्च स तां कुंडलीमुत्पा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





टयति, तावत्तन्मध्यादकस्माद्धब्दोऽभूत्, हे राजन् त्वमेनमुपक्रमं मा कुरु? इमं भांडागारं त्वं न प्राप्नोषि. अस्य भांडगारस्य भोक्ता उज्जयिन्यां नगर्यां विक्रमादित्यो राजा भविष्यति. इदृशीं वाणीं श्रुत्वा विलक्षीभूतो राजा विक्रमसिंहः पश्चाद्वलित्वा स्वपुरे समागतः, कुरुबकश्च तेनाजीविकां दत्वा स्थापितः. कियत्कालानंतरं स राजा कालं कृत्वा दिवं गतः, क्रमेण कुरुबकोऽपि मृत्युं प्राप्तः.

कालांतरे उज्जयिन्यां महासाहसिकशिरोमणिर्विक्रमादित्यो राजाभूत्. तेन निजपराक्रमेणाग्निवेतालः स्ववशे कृतः. संतुष्टेन वेतालेन तस्मै अंबमस्य तद्दिव्यं सिंहासनं सुवर्णपुरुषश्च दत्तः, तथैव हरिश्चंद्रनृपभांडागारसत्कानि सकलानि वस्तूनि तस्मै दत्तानि, वेतालस्य सान्निध्याद्विक्रमादित्येन सर्वापि पृथ्वी ऋणोत्तीर्णा कृता, निजसंवत्सरश्च प्रावर्त्तितः. तत्र सिंहासने समुपविश्य स चिरं राज्यं कृत्वा धर्मं च समाराध्य शरीरं त्यक्त्वा स्वर्गं गतः. एवं—

सत्त्वाद्विद्याधरेशाः सुरपतिसदृशा नाकिनो दानवेंद्राः । कुर्वंति किंकरत्वं गगनगमनकृन्मंत्रविद्यौषधाद्याः ॥ इत्याद्या सर्वसंपद्भवति हि सुलभा धर्मकामार्थसिद्धिः । संपद्यंते पदार्थाः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकलसुखकराश्चांबडस्येव पुंसां ॥ १ ॥ सरसरम्यमिदं हि कथानकं । श्रवणहारि हृदीह वि-
नोदकृत् ॥ अमरसूरिसुपंम्डितनिर्मितं । सुगमगद्यमयं जयताच्चिरं ॥ २ ॥ धर्मात्संपद्यते जो-
गो । धर्माच्च सुखसंपदः ॥ धर्मात्स्वर्गापवर्गौ च । धर्मः कल्पद्रुमोपमः ॥ ३ ॥ इति श्रीअ-
मरसूरिपंडितनिर्मितं श्रीअंबडचरित्रं समाप्तं ॥ आ ग्रंथनी मूळजाषा अस्थव्यस्थ हती, ते
बनते प्रयासे सुधारीने आ ग्रंथ स्वपरना उपकारमाटे श्रीजामनगरनिवासि पंडित श्रावक
हीरालाल हंसराजे पोताना जैनजास्करोदयछापखानामां छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

---



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीअंबडचरित्रं समाप्तं ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only